॥ ॐ श्रीगणेशाय नमः ॥

॥ ॐ नमो भगवते वासुदेवाय ॥

श्रीमहाभारतोक्त श्रीविष्णुसहस्रनाम्नां नमोन्ता

श्री विष्णुसहस्रनामावली

सेयं

पण्डित मूर्धन्य श्रीशिवराम शास्त्रिणामात्मजेन श्रीवागीश्वर शास्त्रिणा
स्वोपज्ञ भावदीपिकाख्य वृत्या समलंकृता ।

सम्पादकः—

श्रीवागीश्वर शास्त्री, सुमनोत्तरान्वयोत्तंसः ऊधमपुर मण्डलान्तर्गत
रामनगर तहसीलान्तरालस्थ घोरडी ग्रामाभिजनः ।

आमुखीय संस्करणम् ।

मूल्यम् —प्रत्यहं-श्रद्धाभक्ति
ध्यान शमादि साहित्येन पाठः ।

२०५६ वैक्रमे समे ज्येष्ठमासीय-
श्रीगङ्गा दशम्याम् ॥

वैष्णवी प्रिंटिंगप्रेस वाईपास सिद्धाटवी (सेधड़ा) जम्मू तवियी

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

सम्पादकीयम्

ॐ श्रीगणेशाय नमः

श्री साम्बसदा शिवाभिवन्दनम् ॥

ॐ यस्याग्रे द्राड द्राड द्रुम द्रुम द्रुमितं द्रुण्ट द्रुण्टीति नादं
डंसे डंसे डुडंसे डुह डुह डुकृतं झपकं झंपनादम् ॥
त्रैढं त्रैढं त्रित्रैढं त्रिखु खु खु ख ख कृतं खां क कं खां क नादं
वाद्यैः पञ्चप्रभाव प्रहसित वदन पातु मां शूलपाणिः ॥

सिंहादुत्थाय कोपाद् धड धड धडा धावमाना भवानी
दैत्यानां दिव्य शस्त्रैस्तट तट तटा त्रोटयन्ती शिरांसि ।
तेषां रक्तं पिबन्ती घुट घुट घुटा प्रेरयन्ती पिशाचान्
तृप्ता तृप्ता हसन्ती खद खद खदा शाम्भवी मां पुनातु ॥

द्वित्रा कथाः—

नाविदितमस्त्येतत्सर्वेषामिलावलयवर्त्तिनां, समस्ततन्त्राकूपार पारदृश्वनां विशेषविशुद्धविवेकप्रवेकवतां विदुषां महात्मनाञ्च। यदनाद्यने हसः अस्तोकबाधाबाधिते,ऽस्मिन्नगाधे जगज्जलनिधौ आमूलचूलक्रिया समभिहारद्वारात्रुडनपारम्परीमनुभवतां, अथ च महामोहमिहिका घोर घोरतरशम्पासम्पातप्रभावपरिष्वक्तानां प्रतिघस्रं अपरिहार्यकाल कलनासंकलितायुषां जनानामुद्धाराय नान्या काचनानुपमसौख्यसौरस्य सन्देह सुभगा सुदृढातरी. श्रीमन्नारायणचरणशरणादृते। अपवर्गोपलब्धि रपि अनन्तानेकजन्मपुञ्जोपार्जितस्वकृतसुकृतपरिपाटीसमुपलब्ध साहाय्येन सुखसन्दोह्यतामञ्चति । अत्रार्थे आम्नायाम्रेडनमपि ईषत्करता-माटीकते । षड्भावविकारोत्थषड्ऊर्मिजन्यक्लान्तताव्यपोहनाय अनन्त निःस्सीमक्षेमभूमाप्रदातृत्वं जनार्दनचरणारविन्दशरणादृते नान्यस्य सम्बोभविष्यमानतामुररी करोति । भवपद्याध्वनीनैः अनन्तशतावाप्त्यैक साधनत्वेनोपगीयमानमहिमामालीकीर्त्तनीयसत्कथः भगवच्छब्दवाच्यो-प्यनिर्वाच्यस्वरूपः, अयमेव श्रोतव्यो ज्ञातव्यः मन्तव्यश्चेति । हरिनाम स्मरणं

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

कलिकल्मषहरं इत्यत्र नास्ति विसंवादः। केवलं उदरदरी पूरणंस्य, कुटुम्बाभरणंम् इत्युभावेव जीवने सार्थकसाफल्यताप्रदौ न भवतः, एकस्मिन्नहो रात्रेषट्शताधिकैकविंशतिसहस्र श्वाससंख्या भवति। प्रतिश्वासम् अस्यैवोपास्यता कार्येति नास्त्यत्र मेनागपि विशयव्यामोहः। श्लोकपाठस्य, तथा सोङ्कार नमोन्तपाठस्य महत्ता सार्थक्येन अवाच्यगौरवं प्रपुष्णाति। किं बहुना प्रत्यभिधानं सोङ्कारता नमोन्तता च परितस्तया भद्रतां व्यनक्ति मयापि एतदेवाभिवीक्ष्य स्वीय प्रमुष्ट शेमुषी परिष्करणायैवेतन्मुद्रणादिभारोनिर्व्यूढः शारदा कुमारी, तथा विमला कुमारीत्येते मद्दुहितरौ स्त एतयोः प्रेरणयापि मयात्रप्रवर्त्तितम मत्तनूजेन श्रीसरोजदेवी गर्भजेन चिरञ्जीविना साहित्याचार्यपदवीभाजा श्री उद्योत कुमार शास्त्रिणा, उत्तानुक्तदुरुक्तचिन्तनविधौ इदमीयमुद्रणे साहाय्यमाचरितमित्यतः सोऽपि भृशं साधुवादार्हः। त्रिस्कन्ध ज्योतिषाकूपारपारगैरनन्यहृदयैः शास्त्राटवीसञ्चरणपञ्चाननैः स्वत्रभवद्भिः डाक्टरपदाभिलप्यैः श्रीविहारीलालवासिष्ठमहाभागैः स्वीयमनर्घ्यं समयं निष्कास्यैतदीय प्रूफ मृजादि विधासु सुमहदुपकृतमित्यतस्तेषामुपकारभारः प्रह्वोत्तमाङ्गवेनादवहन् विरम्यते विस्तरादिति।

अवसाने च

येषां श्रीमत्तातपादाना अनुशासने स्थित्वा अज्ञानान्धतमसविपाटनक्षमा ज्ञानविज्ञानकणिकाः समुपलब्धाः समुपार्जिताश्च, तत्प्रत्युपकृतावशक्तोऽजातमेव तेभ्यः समर्पय इति। ये महाभागैः अस्य मुद्रापणे आर्थिकसाहाय्य विहितं तेषामभिधानानि:—

१—श्री शिवकुमार शर्मा द्विवेदी (कटडा)।

२—श्री पं० जगदीश मिश्राः।

३ स्व० युगलकिशोर गुप्तस्य धर्म पत्नी श्री कृष्णादेवी गान्धीनगर पं० मोहनलाल शर्मा, (सुनेत्र वास्तव्य)

इति सप्रश्रयं निवेदयते

विद्वद्विधेयः

(वागीश्वर शास्त्री)

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

विष्णुसहस्रनाम्ना पूर्वपाठिका

ॐ पायादपायाद् भगवान् पपीर्नः

एवं नु ध्यातव्यं यत्किल शरणयास्थस्य, विगतसर्वैषणस्य दशदिवस पर्यन्त मन्यानपेक्षतया, महाभारतसमराकूपारमन्थनं विदधतस्तत्रभवतः श्री भीष्मस्याश्याशे युधिष्ठिरेणागत्य- लोके एकदैवत किम्! परमं सर्वेषां परायणं किम्। कस्य वरिवस्यया अक्षयशुभावाप्तिः। भवेऽस्मिन् सर्वधर्माणां मध्ये सर्वोत्कृष्टत्वेन को धर्मः, तथा किजपन् जन्तुः संसारबन्धनात् मुच्यते, इत्यात्मक प्रश्नपञ्चकस्थविचिकित्सापनुत्यै गांङ्गेयः अनुयुक्तः सर्वस्मादस्मात्पूर्व दानधर्म, राजधर्म, स्त्रीधर्मापद्धर्मादीनां यथोचित उपदेशविश्राणनमपि तेनैव समकृत। ईदृशं उपदेशपीयूषं निपीयापि युधिष्ठिरः शान्ति न लेभे, साम्प्रतं पुनरक्षुण्णानन्तशातावाप्त्यैक साधनप्राप्तये प्रार्थितेन भीष्मेण श्रीविष्णु-सहस्रनाम्नामुपदेशेनानुगृहीतो युधिष्ठिर कृतकृत्यतानुषङ्गिनीं परमां मुदमापेदे स्तवोऽयं श्रीमहाभारतसारनिष्कर्ष रूपत्वेन विराजते। महत्वाद् भारवत्वाच्च महाभारतमुच्यते। निरुक्ते यस्य यो वेद सर्वपापैः प्रमुच्यते' इतिकृतिभि-राम्नातम्। एतदस्य निरुक्तमेतदन्तर्गतमेवेत्यत अन्यसहस्रनामभ्यः अस्यैव-वैशिष्ट्यं, सर्वान्तरङ्गता चास्य अनिह्नुत लक्षणाविभासते। सप्रणव नमोन्त-सहस्रनाम्नां पाठ न्यकूकृतान्यातिशयत्वेन श्रद्धाभक्तिध्यानशमादीनां दाढार्ढ्यानुप्राणकः नास्त्यत्र केषाञ्चिदपि विशयलवः। सतामरुन्तुदं दुर्धर्षं समुपागतं कलिकालमवेक्ष्य मन्त्राणामसदुपयोगं कर्तुमादत मनसामसतां गत्यवरोधाय महामायया मन्त्राणां कीलनं विहितम्। केवलमग्रैवाकीलितत्वं चकास्तीति नात्र व्यामोहलवः। केवलं प्रणवोच्चारणमपि प्राग्भवपुञ्जोपार्जिता-संख्येयवृजिनानां विलयनिदानं भवति, किमुतसहस्रनाम्नां अनुशीलन क्रियासमभिहार पारम्परी पर्यायाम्रेडनेन पुण्यपुञ्जोपलब्धिरिति विभावयन्तु सुधियः। मयापि विदुषां प्रसत्तये, अथ च स्वीयप्रमुष्टशेमुषी दोषप्रमोषाय, प्राग्भवोपार्जित कश्मलाकूपारसंशोषनाय, चेयं नमोन्ता सप्रणवाभाव दीपिकाख्यव्याख्योपेता श्रीविष्णुसहस्रनामावलिः यथा स्वं संग्रथ्य अशरण

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

शरण्यस्य नारायणस्यपदपयोजयोरुपदाकृतेति विभावनीयं अप्रातिस्विकधिषणं स्तत्रभवद्भिः । द्विकाः किलनिजसौगन्ध्य व्यामोहित जनमानसं सहकारं विहाय निम्बद्रौ फलजग्धि प्रसिता भवन्तीति किमु वाच्यम् । भगवन्नाम्न महात्म्यमुपवर्णयितुं शेषोऽपि नेशः । येन केनापि रूपेण भगवदाराधनमेव परम पुमर्थसाधनम् । तरवोऽपि प्राणन्ति, भस्त्रा अपि श्वसन्ति, नैषां श्वसनं प्राणनं गणनार्हतामञ्चति । मयाप्येतत् प्रयासः श्रितश्रुति मार्गाणां भव्याशयान मानसमरालीयानन्दथुसम्पादनायैव निर्व्यूढः ।

पराङ्मुखदावदाः काकन्तः मात्सर्यजुष्टस्वान्तस्काः खलजना स्वैरंजल्पन्तु, निन्दन्तु, भषन्तु जायन्तु जीवन्तुवेत्यत्र नास्त्यस्माकं मनागपि मनस्कार लेशः ।

इति सम्प्रार्थयते विद्वदाश्रवः
श्रीशिवराम शास्त्रिणामात्मजः श्रीवागीश्वरः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

विद्वन्मूर्धन्याः प्रातः स्मरणीया अस्मत्तातपादाः श्रीशिवराम शास्त्रिणः

सर्वतन्त्रा परतन्त्राः मदीय मध्यमभ्रातरः श्रीवाचस्पति शास्त्रिणः

समर्हणीया मम प्रसवित्री कौडी नाम्नी

श्रौतस्मार्त्त कर्मकाण्ड निष्णाताः मदीय ज्येष्ठ सहोदराः श्री ढुण्ढीराज शास्त्रिणः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

वागीश्वर शास्त्री साहित्याचार्यः



अनन्यहृदया विद्वन्मण्डल मूर्धन्याः
श्री विहारोलाल शास्त्रिणः

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

अथ

श्री विष्णुसहस्रनामस्तवः

॥ ॐ श्रीगणेशाय नमः ॥

ॐ यस्यस्मरण मात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥

वैशम्पायन उवाच

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनव पुनरेवाभ्यभाषत ।१।

युधिष्ठिर उवाच

किमेक दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवा शुभम् ।२।
को धर्मः सर्वधर्माणां भवतः परमोमतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ।३।

भीष्म उवाच

जगत्प्रभुं देवदेवमनन्त पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ।४।
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ।५।
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ।६।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्त्तिवर्धनम् ।
लोकनाथ महद्भूत सर्वभूतभवो भवम् ।७।
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ८
परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं य परायणम् ।९।
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्
दैवतं देवतानां यो भूतानां योऽव्ययः पिता ।१०।
यतः सर्वाणि भूतानि भवन्त्यादि युगागमे ।
यस्मिंश्च प्रलय यान्ति पुनरेव युगक्षये ।११
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नाम सहस्रं मे शृणु पापभयापहम् ।१२
यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये १३।

अथ ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ।
य ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ।।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ।१४।
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ।१५।
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ।१६।
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ।१७।
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ।१८
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ।१९।
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्र मङ्गलं परम् ।२०।
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ।२१।
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ।२२।
सुरेशः शरण शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ।२३।
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ।२४।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

वसुर्वसुमनाः सत्य समात्मा सम्मितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृति ।२५।
रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवा ।
अमृतः शाश्वतस्थाणुवरारोहो महातपाः २६।
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ।२७।
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुज ।२८।
भ्राजिष्णुर्भोजन भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः २९
उपेन्द्रो वामन प्रांशुरमोघः शुचिरूर्जितः
अतीन्द्र संग्रहः सर्गो धृतात्मा नियमो यमः ।३०।
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधु
जतीन्द्रियो महामायो महोत्साहो महाबलः ।३१।
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ।३२।
महेश्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ३३।
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तम ।
हिरण्यनाभ सुतपाः पद्मनाभः प्रजापतिः ।३४।
अमृत्युः सर्वदृक् सिंहः संधाता संधिमान्स्थिरः ।
अजो दुर्मर्षण शास्ता विश्रुतात्मा सुरारिहा ।३५।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ।३६।
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ।३७।
आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।
अह संवर्तको वह्निरनिलो धरणीधरः ।३८।
सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ।३९।
असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ४०।
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ४१।
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ।४२।
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ।४३।
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ।४४।
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ।४५।
युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ।४६।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ।४७।

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ।४८।

स्कन्दः प्रथितः प्राणः प्राणदो वासवानुजः ।
वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ।४९।

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ।५०।

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ।५१।

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः ।५२।

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ।५३।

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ।५४।

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ५५।

रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ।५६।

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ।५७।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ५८।

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ५९।
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ६०।

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ।६१।
सुव्रत सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ।६२।
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ।६३।

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ।६४।
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ६५।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ।६६।

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ।६७।

जीवो विनयितासाक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ।६८।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ।६९।
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ७०।
महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ।७१।
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ७२।
भगवान् भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ७३।
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ७४।
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ७५।
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ७६।
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ७७।
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमांल्लोकत्रयाश्रयः ।७८।
स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ।७९।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ।८०।
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ।८१।
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ।८२।
कामदेव कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ।८३।
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ।८४।
महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ।८५।
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ।८६।
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ।८७।
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ।८८।
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ।८९।
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ।९०।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ९१।
सुवर्णवर्णो हेमाङ्गो बराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ।९२।
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ।९३।
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ९४।
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ९५।
समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुर्गो दुरावासो दुरारिहा ।९६।
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ।९७।
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ।९८।
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ।९९।
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ।१००।
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ।१०१।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः १०२।

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्द्धनः १०३।
भारभृत्कथितो योगी योगीश सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ।१०४।

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजिः सर्वसहो नियन्ता नियमो यमः ।१०५।
सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ।१०६।
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ।१०७।

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ।१०८।
सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिद स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ।१०९।

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ।११०।

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ।१११।
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहारक्षणः सन्तो जीवनः पर्यवस्थितः ।११२।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ।११३।

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ।११४।

आधारनिलयो धाता पुष्पहासः प्रजागर ।
ऊर्ध्वग सत्पथाचारः प्राणदः प्रणवः पणः ।११५।

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्व तत्त्वंविदेकात्मा जन्ममृत्युजरातिगः ११६।

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ।११७।

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ११८।

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनन्दन स्रष्टा क्षितीश पापनाशन ।११९।

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ।१२०।

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्र दिव्यानामशेषेण प्रकीर्तितम् ।१२१।

य इद शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
न शुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ।१२२।

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ।१२३।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम् ।१२४।
भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् १२५।
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् १२६।
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ।१२७।
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ।१२८।
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ।१२९।
वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ।१३०।
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ।१३१।
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ।१३२
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ।१३३।
द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ।१३४।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ।१३५।

इन्द्रियाणि मनो बुद्धिः सत्त्व तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ।१३६।

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ।१३७।

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गम चेद जगन्नारायणोद्भवम् ।१३८।

योगो ज्ञान तथा सांख्यं विद्या शिल्पादि कम च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् १३९।

एको विष्णुर्महद्भूत पृथग्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ।१४०।

इमं स्तव भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुष श्रेयः प्राप्तुं सुखानि च ।१४१।

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ।१४२।



ॐ तत्सदिति श्रीमहाभारतते शतसाहस्र्यां संहितायां
वैयासिक्यामानुशासनिके पर्वणि भीष्मयुधिष्ठिर-
सवादे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रम् ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

अथ विष्णु सहस्रनाममाला

अस्य श्री विष्णोर्दिव्यसहस्रनामस्तोत्रमन्त्रस्य भगवान् वेदव्यास पिः, अनुष्टुप् छन्दः, श्रीकृष्णः परमात्मा देवता, अमृतांशूद्भवो भानुरिति जम् देवकीनन्दनः स्रष्टेति शक्तिः, त्रिसामा-सामगः सामेति हृदयम् ृखभृन्नन्दकी चक्रीति कीलकम्, शार्ङ्गधन्वा गदाधर इत्यस्त्रम्, रथाङ्गपाणि-ीभ्य इति कवचम्, उद्भवः क्षोभणो देव इति परमो मन्त्रः, श्रीविष्णु-यर्थे जपे (होमे) (सहस्रतुलसीदल समर्पणे) च विनियोगः।

. ॐ विश्वस्मै नमः।
. ॐ विष्णवे नमः।
. ॐ वषट्काराय नमः।
. ॐ भूतभव्यभवत्प्रभवे नमः
. ॐ भूतकृते नमः।
. ॐ भूतभृते नमः।
. ॐ भावाय नमः।
. ॐ भूतात्मने नमः।
. ॐ भूतभावनाय नमः।
०. ॐ पूतात्मने नमः।
१. ॐ परमात्मने नमः।
२. ॐ मुक्तानांपरमगतये०
३. ॐ अव्ययाय नमः।
४. ॐ पुरुषाय नमः।
५. ॐ साक्षिणे नमः।

१६. ॐ क्षेत्रज्ञाय नमः।
१७. ॐ अक्षराय नमः।
१८. ॐ योगाय नमः।
१९. ॐ योगविदांनेत्रे नमः।
२०. ॐ प्रधानपुरुषेश्वराय०
२१. ॐ नारसिंहवपुषे नमः।
२२. ॐ श्रीमते नमः।
२३. ॐ केशवाय नमः।
२४. ॐ पुरुषोत्तमाय नमः।
२५. ॐ सर्वस्मै नमः।
२६. ॐ शर्वाय नमः।
२७. ॐ शिवाय नमः।
२८. ॐ स्थाणवे नमः।
२९. ॐ भूतादये नमः।
३०. ॐ अव्ययनिधये नमः।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

३१. ॐ सम्भवाय नमः ।
३२. ॐ भावनाय नमः ।
३३. ॐ भर्त्रे नमः ।
३४. ॐ प्रभवाय नमः ।
३५. ॐ प्रभवे नम ।
३६. ॐ ईश्वराय नमः ।
३७. ॐ स्वयम्भुवे नमः ।
३८ ॐ शम्भवे नमः ।
३९. ॐ आदित्याय नमः ।
४०. ॐ पुष्कराक्षाय नमः ।
४१. ॐ महास्वनाय नमः ।
४२. ॐ अनादिनिधनाय नमः।
४३. ॐ धात्रे नमः ।
४४. ॐ विधात्रे नमः ।
४५. ॐ धातुरुत्तमाय नमः ।
४६. ॐ अप्रमेय य नमः ।
४७. ॐ हृषीकेशाय नमः ।
४८. ॐ पद्मनाभाय नमः ।
४९. ॐ अमरप्रभवे नम ।
५०. ॐ विश्वकर्मने नमः ।
५१. ॐ मनवे नमः ।
५२. ॐ त्वष्ट्रे नमः ।
५३. ॐ स्थविष्ठाय नमः ।
५४. ॐ स्थविरोध्रुवाय ।
५५. ॐ अग्राह्याय नमः ।
५६. ॐ शाश्वताय नमः ।
५७. ॐ कृष्णाय नमः ।
५८. ॐ लोहिताक्षाय नमः ।
५९. ॐ प्रतदनाय नमः ।
६०. ॐ प्रभूताय नमः ।
६१. ॐ त्रिककुब्धाम्ने नमः
६२. ॐ पवित्राय नमः ।
६३. ॐ मङ्गलपराय नमः ।
६४. ॐ ईशानाय नमः ।
६५. ॐ प्राणदाय नमः ।
६६. ॐ प्राणाय नमः ।
६७. ॐ ज्येष्ठाय नमः ।
६८. ॐ श्रेष्ठाय नमः ।
६९. ॐ प्रजापतये नमः ।
७०. ॐ हिरण्यगर्भाय नमः
७१. ॐ भूगर्भाय नमः ।
७२. ॐ माधवाय नमः ।
७३. ॐ मधुसूदनाय नमः ।
७४. ॐ ईश्वराय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

७५. ॐ विक्रमिणे नमः ।
७६. ॐ धन्विने नमः ।
७७. ॐ मेधाविने नमः ।
७८. ॐ विक्रमाय नमः ।
७९. ॐ क्रमाय नमः ।
८०. ॐ अनुत्तमाय नमः ।
८१. ॐ दुराधर्षाय नमः ।
८२. ॐ कृतज्ञाय नमः ।
८३. ॐ कृतये नमः ।
८४. ॐ आत्मवते नमः ।
८५. ओं सुरेशाय नमः ।
८६. ओं शरणाय नमः ।
८७. ओं शर्मणे नमः ।
८८. ओं विश्वरेतसे नमः ।
८९. ओं प्रजाभवाय नमः ।
९०. ओं अह्ने नमः ।
९१. ओं संवत्सराय नमः ।
९२. ओं व्यालाय नमः ।
९३. ओं प्रत्ययाय नमः ।
९४. ओं सर्वदर्शनाय नमः ।
९५. ओं अजाय नमः ।
९६. ओं सर्वेश्वराय नमः ।
९७. ओं सिद्धाय नमः ।
९८. ओं सिद्धये नमः ।
९९. ओ सर्वादये नमः ।
१००. ओं अच्युताय नमः ।
१०१ ओं वृषाकपये नमः ।
१०२. ओं अमेयात्मने नमः ।
१०३. ओं सर्वयोगविनिःसृताय०
१०४. ओं वसवे नमः ।
१०५. ओं वसुमनसे नमः ।
१०६. ओं सत्याय नमः ।
१०७. ओं समात्मने नमः ।
१०८. ओं सम्मिताय नमः ।
१०९. ओं समाय नमः ।
११०. ओं अमोघाय नमः ।
१११. ओं पुण्डरीकाक्षाय नमः
११२. ओं वृषकर्मणे नमः ।
११३. ओं वृषाकृतये नमः ।
११४. ओं रुद्राय नमः ।
११५. ओं बहुशिरसे नमः ।
११६. ओं बभ्रवे नमः ।
११७. ओं विश्वयोनये नमः ।
१८. ओं शुचिश्रवसे नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

११९. ओं अमृताय नमः ।
१२०. ओं शाश्वतस्थाणवे नमः।
१२१. ओं वरारोहाय नमः ।
१२२. ओं महातपसे नमः ।
१२३. ओं सर्वगाय नमः ।
१२४. ओं सर्वविद्भानवे नमः
१२५. ओं विष्वक्सेनाय नमः।
१२६. ओं जनार्दनाय नमः ।
१२७. ओं वेदाय नमः ।
१२८. ओं वेदविदे नमः ।
१२९. ओं अव्यङ्गाय नमः ।
१३०. ओं वेदाङ्गाय नमः ।
१३१. ओं वेदविदे नमः ।
१३२. ओं कवये नमः ।
१३३. ओं लोकाध्यक्षाय नमः ।
१३४. ओं सुराध्यक्षाय नमः ।
१३५. ओं धर्माध्यक्षाय नमः ।
१३६. ओं कृताकृताय नमः ।
१३७. ओं चतुरात्मने नमः ।
१३८. ओं चतुर्व्यूहाय नमः ।
१३९. ओं चतुर्दंष्ट्राय नमः ।
१४०. ओं चतुर्भुजाय नमः ।
१४१. ओं भ्राजिष्णवे नमः
१४२. ओं भोजनाय नमः
१४३. ओं भोक्त्रे नमः ।
१४४. ओं सहिष्णवे नमः ।
१४५. ओं जगदादिजाय न
१४६. ॐ अनघाय नमः
१४७. ॐ विजयाय नमः ।
१४८. ॐ जेत्रे नमः ।
१४९. ॐ विश्वयोनये नम
१५०. ॐ पुनर्वसवे नम ।
१५१. उपेन्द्राय नमः ।
१५२. ॐ वामनाय नमः
१५३. ॐ प्रांशवे नमः
१५४. ॐ अमोघाय नमः
१५५. ॐ शुचये नमः ।
१५६. ॐ ऊर्जिताय नमः
१५७. ॐ अतीन्द्राय नम
१५८. ॐ संग्रहाय नमः ।
१५९. ॐ सर्गाय नमः ।
१६०. ॐ धृतात्मने नमः
१६१. ॐ नियमाय नमः
१६२. ॐ यमाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

१६३. ॐ वेद्याय नमः ।
१६४. ॐ वैद्याय नमः ।
१६५ ॐ सदायोगिने नमः ।
१६६. ॐ वीरघ्ने नमः ।
१६७. ॐ माधवाय नमः ।
१६८ ॐ मधवे नमः ।
१६९. ॐ अतीन्द्रियाय नमः ।
१७०. ॐ महामायाय नमः ।
१७१. ॐ महोत्साहाय नमः ।
१७२. ॐ महाबलाय नमः ।
१७३. ॐ महावृद्धाय नमः ।
१७४. ॐ महावीर्याय नमः ।
१७५. ॐ महाशक्तये नमः ।
१७६. ॐ महाद्युतये नम ।
१७७. ॐ अनिर्देश्यवपुषे नमः
१७८. ॐ श्रीमते नमः ।
१७९. ॐ अमेयात्मने नमः ।
१८०. ॐ महाद्रिधृषे नमः ।
१८१. ॐ महेष्वासाय नम ।
१८२. ॐ महीभर्त्रे नमः ।
१८३. ॐ श्रीनिवासाय नमः।
१८४. ॐ सताङ्गतये नमः ।
१८५. ॐ अनिरुद्धाय नम ।
१८६. ॐ सुरानन्दाय नमः ।
१८७. ॐ गोविन्दाय नमः ।
१८८. ॐ गोविदाम्पतये नमः
१८९. ॐ मरीचये नमः ।
१९०. ॐ दमनाय नमः ।
१९१. ॐ हंसाय नमः ।
१९२. ॐ सुपर्णाय नमः ।
१९३. ॐ भुजगोत्तमाय नमः।
१९४. ॐ हिरण्यनाभाय नमः
१९५. ॐ सुतपसे नमः ।
१९६. ॐ पद्मनाभाय नमः ।
१९७. ॐ प्रजापतये नमः ।
१९८. ॐ अमृत्यवे नमः ।
१९९. ॐ सर्वदृशे नमः ।
२००. ॐ सिंहाय नम ।
२०१. ॐ सन्धात्रे नमः ।
२०२. ॐ सन्धिमते नमः ।
२०३. ॐ स्थिराय नमः ।
२०४. ॐ अजाय नमः ।
२०५. ॐ दुर्मर्षणाय नमः ।
२०६. ॐ शास्त्रे नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

२०७. ॐ विश्रुतात्मने नम ।
२०८. ॐ सुरारिघ्ने नमः ।
२०९. ॐ गुरवे नमः ।
२१०. ॐ गुरुतमाय नमः ।
२११. ॐ धाम्ने नमः ।
२१२. ॐ सत्याय नम ।
२१३ ॐ सत्यपराक्रमाय नमः ।
२१४. ॐ निमिषाय नमः ।
२१५. ॐ अनिमिषाय न ः ।
२१६. ॐ स्रग्विणे नमः ।
२१७. ॐ वाचस्पतिरुदारधिये०
२१८. ॐ अग्रण्ये नमः ।
२१९. ॐ ग्रामण्ये नमः ।
२२०. ॐ श्रीमते नमः ।
२२१. ॐ न्यायाय नमः ।
२२२. ॐ नेत्रे नमः ।
२२३. ॐ समीरणाय नमः ।
२२४. ॐ सहस्रमूर्ध्ने नमः ।
२२५. ॐ विश्वात्मने नम ।
२२६. ॐ सहस्राक्षाय नम ।
२२७. ॐ सहस्रपदे न ः ।
२२८. ॐ आवर्त्तनाय नमः ।
२२९. ॐ निवृत्तात्मने नमः ।
२३०. ॐ संवृताय नमः ।
२३१. ॐ सम्प्रमर्दनाय नमः ।
२३२. ॐ अह. संवर्तकाय नम
२३३. ॐ वह्नयेनमः ।
२३४. ॐ अनिलाय नमः ।
२३५. ओं धरणीधराय नमः
२३६. ओं सुप्रसादाय नमः ।
२३७. ओं प्रसन्नात्मने नमः
२३८. ओं विश्वधृषे नमः
२३९. ओं विश्वभुजे नमः
२४०. ओं विभवे नमः ।
२४१. ओं सत्कर्त्रे नमः ।
२४२. ओं सत्कृताय नमः ।
२४३. ओं साधवे नम ।
२४४. ओं जह्नवे नमः ।
२४५. ओं नारायणाय नमः
२४६. ओं नराय नमः ।
२४७. ओं असंख्येयाय नमः
२४८. ओं अप्रमेयात्मने नमः
२४९. ओं विशिष्टाय नमः
२५०. ओं शिष्टकृते नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

२५१. ओं शुचये नमः ।
२५२. ओं सिद्धार्थाय नमः ।
२५३. ओं सिद्धसङ्कल्पाय नमः।
२५४. ओं सिद्धिदाय नमः ।
२५५. ओं सिद्धिसाधनाय नमः ।
२५६. ओं वृषाहिने नमः ।
२५७. ओं वृषभाय नमः ।
२५८. ओं विष्णवे नमः ।
२५९. ओं वृषपर्वणे नमः ।
२६०. ओं वृषोदराय नमः ।
२६१. ओं वर्द्धनाय नमः ।
२६२. ॐ वर्द्धमानाय नमः ।
२६३. ॐ विविक्ताय नमः ।
२६४. ॐ श्रुतिसागरायनमः ।
२६५. ॐ सुभुजाय नम ।
२६६. ॐ दुर्धराय नमः ।
२६७. ॐ वाग्मिने नमः ।
२६८. ॐ महेन्द्राय नमः ।
२६९. ॐ वसुदाय नमः ।
२७०. ॐ वसवे नमः ।
२७१. ॐ नैकरूपाय नमः ।
२७२. ॐ बृहद्रूपाय नमः ।
२७३. ॐ शिपिविष्टाय नमः ।
२७४. ॐ प्रकाशनाय नमः ।
२७५. ॐ ओजस्तेजोद्युतिधराय०
२७६. ॐ प्रकाशात्मने नमः ।
२७७. ॐ प्रतापनाय नमः ।
२७८ ॐ ऋद्धाय नमः ।
२७९. ॐ स्पष्टाक्षराय नमः ।
२८०. ॐ मन्त्राय नमः ।
२८१ ॐ चन्द्रांशवे नमः ।
२८२. ॐ भास्करद्युतये नमः ।
२८३. ॐ अमृतांशूद्भवाय नमः ।
२८४. ॐ भानवे नमः ।
२८५. ॐ शशिबिन्दवे नमः ।
२८६. ॐ सुरेश्वराय नमः ।
२८७. ॐ औषधाय नमः ।
२८८. ॐ जगत सेतवे नमः ।
२८९. ॐ सत्यधर्मपराक्रमाय०
२९०. ॐ भूतभव्यभवन्नाथाय०
२९१. ॐ पवनाय नमः ।
२९२. ॐ पावनाय नमः ।
२९३. ॐ अनलाय नमः ।
२९४. ॐ कामघ्ने नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

२९५. ॐ कामकृते नमः ।
२९६. ॐ कान्ताय नमः ।
२९७. ॐ कामाय नमः ।
२९८. ॐ कामप्रदाय नमः ।
२९९. ॐ प्रभवे नमः ।
३००. ॐ युगादिकृते नमः ।
३०१. ॐ युगावर्त्ताय नमः ।
३०२. ॐ नैकमायाय नमः ।
३०३. ॐ महाशनाय नमः ।
३०४. ॐ अदृश्याय नमः ।
३०५. ॐ अव्यक्तरूपाय नमः ।
३०६. ॐ सहस्रजिते नमः ।
३०७ ॐ अनन्तजिते नमः ।
३०८ ओ इष्टाय नमः ।
३०९. ओं विशिष्टाय नमः ।
३१०. ओ शिष्टेष्टाय नमः ।
३११ ओं शिखण्डिने नमः ।
३१२ ओं नहुषाय नमः ।
३१३. ओं वृषाय नमः ।
३१४ ओं क्रोधघ्ने नमः ।
३१५. ओं क्रोधकृत्कर्त्रे नमः ।
३१६. ओं विश्वबाहवे नमः ।
३१७. ओं महीधराय नमः ।
३१८. ओं अच्युताय नमः ।
३१९. ओं प्रथिताय नमः ।
३२०. ॐ प्राणाय नमः ।
३२१. ॐ प्राणदाय नमः ।
३२२. ॐ वासवानुजाय नमः ।
३२३. ॐ अपांनिधये नमः ।
३२४. ॐ अधिष्ठानाय नमः ।
३२५. ॐ अप्रमत्ताय नमः ।
३२६. ॐ प्रतिष्ठिताय नमः ।
३२७. ॐ स्कन्दाय नमः ।
३२८. ॐ स्कन्दधराय नमः ।
३२९. ॐ धुर्याय नमः ।
३३०. ओं वरदाय नमः ।
३३१. ओं वायुवाहनाय नमः ।
३३२. ओं वासुदेवाय नमः ।
३३३. ओं बृहद्भानवे नमः ।
३३४. ओं आदिदेवाय नमः ।
३३५. ओं पुरन्दराय नमः ।
३३६. ओं अशोकाय नमः ।
३३७. ओं तारणाय नमः ।
३३८. ओं ताराय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

३३९. ओं शूराय नमः ।
३४०. ओं शौरये नमः ।
३४१. ओं जनेश्वराय नमः ।
३४२. ओं अनुकूलाय नमः ।
३४३. ओं शतावर्त्ताय नमः ।
३४४. ओं पद्मिने नमः ।
३४५. ओं पद्मनिभेक्षणाय नमः ।
३४६. ओं पद्मनाभाय नमः ।
३४७. ओं अरविन्दाक्षाय नमः ।
३४८. ओं पद्मगर्भाय नमः ।
३४९ ओं शरीरभृते नमः ।
३५०. ओं महर्द्धये नमः ।
३५१. ओ ऋद्धाय नमः ।
३५२. ओं वृद्धात्मने नमः ।
३५३. ओं महाक्षाय नमः ।
३५४. ओं गरुडध्वजाय नमः ।
३५५. ओं अतुलाय नमः ।
३५६. ओं शरभाय नमः ।
३५७. ओं भीमाय नमः ।
३५८. ओं समयज्ञाय नमः ।
३५९. ओं हविर्हरये नमः ।
३६०. ओं सर्वलक्षणलक्षण्याय ।
३६१. ओं लक्ष्मीवते नमः ।
३६२. ओं समितिञ्जयाय नमः ।
३६३. ओं विक्षराय नमः ।
३६४. ओं रोहिताय नमः ।
३६५. ओं मार्गाय नमः ।
३६६. ओं हेतवे नमः ।
३६७. ओं दामोदराय नमः ।
३६८. ओं सहाय नमः ।
३६९. ओं महीधराय नमः ।
३७०. ओं महाभागाय नमः ।
३७१. ओं वेगवते नमः ।
३७२. ओं अमिताशनाय नमः ।
३७३. ओं उद्भवाय नमः ।
३७४. ओं क्षोभणाय नमः ।
३७५. ओं देवाय नमः ।
३७६. ओं श्रीगर्भाय नमः ।
३७७. ओं परमेश्वराय नमः ।
३७८. ॐ करणाय नमः ।
३७९. ॐ कारणाय नमः ।
३८०. ॐ कर्त्रे नमः ।
३८१. ॐ विकर्त्रे नमः ।
३८२. ॐ गहनाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

३८३. ॐ गुहाय नमः ।
३८४. ॐ व्यवसायाय नमः ।
३८५. ॐ व्यवस्थानाय नमः ।
३८६. ॐ संस्थानाय नमः ।
३८७. ॐ स्थानदाय नमः ।
३८८. ॐ ध्रुवाय नमः ।
३८९. ॐ परर्द्धये नमः ।
३९०. ॐ परमस्पष्टाय नमः ।
३९१. ॐ तुष्टाय नमः ।
३९२. ॐ पुष्टाय नमः ।
३९३. ॐ शुभेक्षणाय नमः ।
३९४. ॐ रामाय नमः ।
३९५. ॐ विरामाय नमः ।
३९६. ॐ विरजसे नमः ।
३९७. ॐ मार्गाय नमः ।
३९८. ॐ नेयाय नमः ।
३९९. ॐ नयाय य नमः ।
४००. ॐ अनयाय नमः ।
४०१. ॐ वीराय नमः ।
४०२. ॐ शक्तिमतां श्रेष्ठाय नमः
४०३. ॐ धर्माय नमः ।
४०४. ॐ धर्मविदुत्तमाय नमः ।
४०५. ॐ वैकुण्ठाय नमः ।
४०६. ओं पुरुषाय नमः ।
४०७. ओं प्राणाय नमः ।
४०८. ओं प्राणदाय नमः ।
४०९ ओं प्रणवाय नमः ।
४१०. ओं पृथवे नमः ।
४११. ओं हिरण्यगर्भाय नमः ।
४१२. शत्रुघ्नाय नमः ।
४१३. ओं व्याप्ताय नमः ।
४१४. ओं वायवे नमः ।
४१५. ओं अधोक्षजाय नमः ।
४१६ ओं ऋतवे नमः
४१७. ओं सुदर्शनाय नमः ।
४१८. ओं कालाय नमः ।
४१९. ओं परमेष्ठिने नमः ।
४२०. ओं परिग्रहाय नमः ।
४२१ ओं उग्राय नमः ।
४२२ ओं संवत्सराय नमः ।
४२३ ओं दक्षाय नमः ।
४२४: ओं विश्रामाय नमः ।
४२५. ओं विश्वदक्षिणाय नमः ।
४२६. ओं विस्ताराय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

४२७. ओं स्थावरस्थाणवे नमः ।
४२८. ओं प्रमाणाय नमः ।
४२९. ओं बीजमव्ययाय नमः ।
४३०. ओं अर्थाय नमः ।
४३१. ओं अनर्थाय नमः ।
४३२. ओं महाकोशाय नमः ।
४३३. ओं महाभोगाय नमः ।
४३४. ओं महाधनाय नमः ।
४३५: ओं अनिर्विण्णाय नमः
४३६ ओं स्थविष्ठाय नमः ।
४३७. ओं अभुवे नमः ।
४३८. ओं धर्मयूपाय नमः ।
४३९. ओं महामखाय नमः ।
४४०. ओं नक्षत्रनेमये नमः ।
४४१. ओं नक्षत्रिणे नमः ।
४४२. ओं क्षमाय नमः
४४३. ओं क्षामाय नमः
४४४. ओं समीहनाय नमः ।
४४५. ओं यज्ञाय नमः ।
४४६. ओं इज्याय नमः ।
४४७. ओं महेज्याय नमः ।
४४८. ओं क्रतवे नमः ।
४४९. ओं सत्राय नमः ।
४५०. ओं सताङ्गतये नमः ।
४५१. ओं सर्वदर्शिने नमः ।
४५२. ओं विमुक्तात्मने नमः ।
४५३. ओं सर्वज्ञाय नमः ।
४५४. ॐ ज्ञानमुत्तमाय नमः ।
४५५. ॐ सुव्रताय नमः ।
४५६. ॐ सुमुखाय नमः ।
४५७. ॐ सूक्ष्माय नमः ।
४५८. ॐ सुघोषाय नमः ।
४५९. ॐ सुखदाय नमः ।
४६०. ॐ सुहृदे नमः ।
४६१. ॐ मनोहराय नमः ।
४६२. ॐ जितक्रोधाय नमः ।
४६३. ॐ वीरबाहवे नमः ।
४६४. ॐ विदारणाय नमः ।
४६५. ॐ स्वापनाय नमः ।
४६६. ॐ स्ववशाय नमः ।
४६७. ॐ व्यापिने नमः ।
४६८. ॐ नैकात्मने नमः ।
४६९. ॐ नैककर्मकृते नमः ।
४७०. ॐ वत्सराय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

४७१. ॐ वत्सलाय नमः ।
४७२. ॐ वत्सिने नमः ।
४७३ ॐ रत्नगर्भाय नमः ।
४७४. ॐ धनेश्वराय नमः ।
४७५. ॐ धर्मगुप्तये नमः ।
४७६ ॐ धर्मकृते नमः ।
४७७. ॐ धर्मिणे नमः ।
४७८. ॐ सते नमः ।
४७९. ॐ असते नमः ।
४८०. ॐ क्षराय नमः ।
४८१. ॐ अक्षराय नमः ।
४८२. ॐ अविज्ञात्रे नमः ।
४८३. ॐ सहस्रांशवे नमः ।
४८४. ॐ विधात्रे नमः ।
४८५. ॐ कृतलक्षणाय नमः ।
४८६. ॐ गभस्तिनेमये नमः ।
४८७. ॐ सत्त्वस्थाय नमः ।
४८८. ॐ सिंहाय नमः ।
४८९. ॐ भूतमहेश्वराय नमः ।
४९०. ॐ आदिदेवाय नमः ।
४९१. ॐ महादेवाय नमः ।
४९२. ॐ देवेशाय नमः ।
४९३. ॐ देवभृद्गुरवे नमः ।
४९४. ॐ उत्तराय नमः ।
४९५. ॐ गोपतये नमः ।
४९६. ॐ गोप्त्रे नमः ।
४९७. ॐ ज्ञानगम्याय नमः ।
४९८. ॐ पुरातनाय नमः ।
४९९. ॐ शरीरभूतभृते नमः ।
५००. ॐ भोक्त्रे नमः ।
५०१. ॐ कपीन्द्राय नमः ।
५०२. ॐ भूरिदक्षिणाय नमः ।
५०३. ॐ सोमपाय नमः ।
५०४. ॐ अमृतपाय नमः ।
५०५. ॐ सोमाय नमः ।
५०६. ॐ पुरुजिते नमः ।
५०७. ॐ पुरुसत्तमाय नमः ।
५०८. ॐ विनयाय नमः ।
५०९. ॐ जयाय नमः ।
५१०. ॐ सत्यसन्धाय नमः ।
५११. ॐ दाशार्हाय नमः ।
५१२. ॐ सात्वतांपतये नमः ।
५१३. ॐ जीवाय नमः ।
५१४. ॐ विनयितासाक्षिणे नमः

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५१५. ओं मुकुन्दाय नमः ।
५१६. ओं अमितविक्रमाय नमः ।
५१७. ओं अम्भोनिधये नमः ।
५१८. ओं अनन्तात्मने नमः ।
५१९. ओं महोदधिशयायनमः ।
५२०. ओं अन्तकाय नमः ।
५२१. ओं अजाय नमः ।
५२२. ओं महार्हाय नमः ।
५२३. ओं स्वाभाव्याय नमः ।
५२४. ओ जितामित्राय नमः ।
५२५. ओं प्रमोदनाय नमः ।
५२६ ओं आनन्दाय नमः ।
५२७. ओं नन्दनाय नमः ।
५२८. ओं नन्दाय नमः ।
५२९. ओं सत्यधर्मिणे नमः ।
५३०. ओं त्रिविक्रमाय नमः ।
५३१. ओं महर्षिकपिलाचार्याय०
५३२. ओं कृतज्ञाय नमः ।
५३३. ओं मेदिनीपतये नमः ।
५३४. ओं त्रिपदाय नमः ।
५३५. ओं त्रिदशाध्यक्षाय नमः
५३६. ओं महाशृङ्गाय नमः ।
५३७. ॐ कृतान्तकृते नमः ।
५३८. ॐ महावराहाय नमः ।
५३९. ॐ गोविन्दाय नमः ।
५४०. ॐ सुषेणाय नमः ।
५४१. ॐ कनकाङ्गदिने नमः ।
५४२. ओं गुह्याय नमः ।
५४३. ओं गम्भीराय नमः ।
५४४. ओं गहनाय नमः ।
५४५. ओं गुप्ताय नमः ।
५४६. ओं चक्रगदाधराय नमः ।
५४७. ओं वेधसे नमः ।
५४८. ओं स्वाङ्गाय नमः ।
५४९. ओं अजिताय नमः ।
५५०. ओं कृष्णाय नमः ।
५५१. ओं दृढाय नमः ।
५५२. ओं सङ्कर्षणाय नमः ।
५५३. ओं वरुणाय नमः ।
५५४. ओं वारुणाय नमः ।
५५५. ओं वृक्षाय नमः ।
५५६. ओं पुष्कराक्षाय नमः ।
५५७. ओं महामनसे नमः ।
५५८. ओं भगवते नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५५९. ओं भगघ्ने नमः ।
५६०. ओं आनन्दिने नमः ।
५६१. ओं वनमालिने नमः ।
५६२. ओं हलायुधाय नमः ।
५६३. ओं आदित्याय नमः ।
६४. ओं ज्योतिरादित्यायनमः
५६५. ओं सहिष्णवे नमः ।
५६६. ओं गतिसत्तमाय नमः ।
५६७. ओं सुधन्वने नमः ।
५६८. ॐ खण्डपरशवे न :।
५६९. ॐ दारुणाय नम. ।
५७०. ॐ द्रविणप्रदाय नमः ।
५७१. ॐ दिवस्पृशे नम. ।
५७२ ॐ सर्वदृग्व्यासाय नमः ।
५७३. ॐ वाचस्पतये नमः ।
५७४. ॐ त्रिसाम्ने नम ।
५७५. ॐ सामगाय नमः ।
५७६. ॐ साम्ने नम ।
५७७. ॐ निर्वाणाय नमः ।
५७८. ओं भेषजाय नमः ।
५७९. ओं भिषजे नम ।
५८० ओं सन्यासकृते नमः ।
५८१. ओं शमाय नम ।
५८२. ओं शान्ताय नमः ।
५८३. ओं निष्ठायै नमः ।
८. ओं शान्त्यै नमः
५८५ ओं परायणाय नमः ।
५८६ ओं शुभाङ्गाय नमः ।
५८७. ओ शान्तिदाय नमः ।
५८८. ओं स्रष्ट्रे नमः ।
५८९. ओ कुमुदाय नम ।
५९०- ॐ कुवलेशयाय नमः ।
५९१. ॐ गोहिताय नमः ।
५९२. ॐ गोपतये नमः ।
५९३. ॐ गोप्त्रे नमः ।
५९४. ॐ वृषभाक्षाय नमः ।
५९५. ॐ वृषप्रियाय नमः ।
५९६. ॐ अनिर्वर्तिने नम. ।
५९७. ॐ निवृत्तात्मने नमः ।
५९८. ॐ संक्षेप्त्रे नमः ।
९९. ॐ क्षेमकृते नमः ।
६००. ॐ शिवाय नमः ।
६०१. ॐ श्रीवत्सवक्षसे नमः
६०२. ॐ श्रीवासाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

६०३. ओं श्रीपतये नमः ।
६०४. ओं श्रीमतां वराय नमः ।
६०५. ओं श्रीदाय नमः ।
६०६. ओं श्रीशाय नमः ।
६०७. ओं श्रीनिवासाय नम ।
६०८. ओं श्रीनिधये नमः ।
६०९. ओं श्रीविभावनाय नमः ।
६१०. ओं श्रीधराय नमः ।
६११. ओं श्रीकरायनमः ।
६१२. ओं श्रेयसे नमः ।
६१३. ओं श्रीमते नमः ।
६१४. ओं लोकत्रयाश्रयाय नमः
६१५. ओं स्वक्षाय नमः ।
६१६. ओं स्वङ्गाय नमः ।
६१७. ओं शतानन्दाय नमः ।
६१८. ओं नन्दिने नमः ।
६१९. ओं ज्योतिर्गणेश्वरायनमः
६२०. ॐ विजितात्मने नमः
६२१. ॐ विधेयात्मने नमः ।
६२२. ॐ सत्कीर्तये नमः ।
६२३. ॐ छिन्नसंशयाय नमः ।
६२४. ॐ उदीर्णाय नमः ।
६२५. ओं सर्वतश्चक्षुषे नमः ।
६२६. ओं अनीशाय नमः ।
६२७. ओं शाश्वतस्थिराय नमः
६२८. ओं भूशयाय नमः ।
६२९. ओं भूषणाय नमः ।
६३०. ओं भूतये नमः ।
६३१. ओं विशोकाय नमः ।
६३२. ओं शोकनाशनाय नमः ।
६३३. ओं अर्चिष्मते नमः ।
६३४. ओं अर्चिताय नमः ।
६३५- ओं कुम्भाय नम ।
६३६. ओं विशुद्धात्मने नमः ।
६३७. ओ विशोधनाय नमः ।
६३८. ओं अनिरुद्धाय नमः ।
६३९. ओं अप्रतिरथाय नमः ।
६४०. ओं प्रद्युम्नाय मः ।
६४१. ओं अमितविक्रमाय नमः
६४२. ओं कालनेमिनिघ्ने नमः ।
६४३. ओं वीराय नमः ।
६४४. ओं शौरये नमः ।
६४५. ओं शूरजनेश्वराय नमः ।
६४६. ओं त्रिलोकात्मने नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

६४७. ॐ त्रिलोकेशाय नमः ।
६४८. ॐ केशवाय नमः ।
६४९. ॐ केशिघ्ने नमः ।
६५०. ॐ हरये नमः ।
५१०. ॐ कामदेवाय नमः ।
६५२. ॐ कामपालाय नमः ।
५३. ॐ कामिने नमः ।
६५४. ॐ कान्ताय नमः ।
६५५. ॐ कृतागमाय नमः ।
५६. ॐ अनिर्देश्यवपुषे नमः ।
६५७. ॐ विष्णवे नमः ।
६५८. ॐ वीराय नमः ।
६५९. ॐ अनन्ताय नमः ।
६६०. ॐ धनञ्जयाय नमः ।
६६१. ॐ ब्रह्मण्याय नमः ।
२. ॐ ब्रह्मकृते नमः ।
६३. ॐ ब्रह्मणे नमः ।
६६४. ओं ब्रह्मणे नमः ।
६६५. ओं ब्रह्मविवर्द्धनाय नमः ।
६६६. ओं ब्रह्मविदे नमः ।
६६७. ओं ब्राह्मणाय नमः ।
६६८. ओं ब्रह्मिणे नमः ।
६६९. ॐ ब्रह्मज्ञाय नमः ।
६७०. ॐ ब्र णप्रियाय नमः ।
६७१. ॐ महाक्रमाय नमः ।
६७२. ॐ महाकर्मणे नमः ।
६७३. ॐ महातेजसे नमः ।
६७४. ॐ महोरगाय नमः ।
६७५. ॐ महाक्रतवे नमः ।
६७६. ॐ महायज्वने नमः ।
६७७. ॐ महायज्ञाय नमः ।
६७८. ॐ महाहविषे नमः ।
६७९. ॐ स्तव्याय नमः ।
६८०. ॐ स्तवप्रियाय नमः ।
६८१. ॐ स्तोत्राय नमः ।
६८२. ॐ स्तुतये नमः ।
६८३. ॐ स्तोत्रे नमः ।
६८४. ॐ रणप्रियाय नमः ।
६८५ ॐ पूर्णाय नमः ।
६८६. ॐ पूरयित्रे नमः ।
६८७. ॐ पुण्याय नमः ।
६८८ ॐ पुण्यकीर्तये नमः ।
६८९. ॐ अनामयाय नमः ।
६९०. ॐ मनोजवाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

६९१. ॐ तीर्थकराय नमः ।
६९२. ॐ वसुरेतसे नमः ।
६९३. ॐ वसुप्रदाय नमः ।
६९४. ॐ वसुप्रदाय नमः ।
६९५. ॐ वासुदेवाय नमः ।
६९६. ॐ वसवे नमः ।
६९७. ॐ वसुमनसे नमः ।
६९८. ॐ हविषे नमः ।
६९९. ॐ सद्गतये नमः ।
७००. ॐ सत्कृतये नमः ।
७०१. ॐ सत्तायै नमः ।
७०२. ॐ सद्भूतये नमः ।
७०३. ॐ सत्परायणाय नमः ।
७०४. ॐ शूरसेनाय नमः ।
७०५. ॐ यदुश्रेष्ठाय नमः ।
७०६. ॐ सन्निवासाय नमः ।
७०७. ॐ सुयामुनाय नमः ।
७०८. ओं भूतावासाय नमः ।
७०९. ओं वासुदेवाय नमः ।
७१०. ओं सर्वासुनिलयायनमः ।
७११. ओं अनलाय नमः ।
७१२. ओं दर्पघ्ने नमः ।
७१३. ओं दर्पदाय नमः ।
७१४. ओं दृप्ताय नमः ।
७१५. ओं दुर्धराय नमः ।
७१६. ओं अपराजिताय नमः ।
७१७. ओं विश्वमूर्तये नमः ।
७१८. ओं महामूर्तये नमः ।
७१९. ओं दीप्तमूर्तये नमः ।
७२०. ओं अमूर्तिमते नमः ।
७२१. ओं अनेकमूर्तये नमः ।
७२२. ओं अव्यक्ताय नमः ।
७२३. ओं शतमूर्तये नमः ।
७२४. ओं शताननाय नमः ।
७२५. ओं एकास्मै नमः ।
७२६. ओं नैकाय नमः ।
७२७. ओं सवाय नमः ।
७२८. ओं कस्मै नमः ।
७२९. ओं कस्मै नमः ।
७३०. ओं यस्मै नमः ।
७३१. ओं तस्मै नमः ।
७३२. ओं पदमनुत्तमाय नमः ।
७३३. ओं लोकबन्धवे नमः ।
७३४. ॐ लोकनाथाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

७३५. ॐ माधवाय नमः ।
७३६. ॐ भक्तवत्सलाय नमः ।
७३७. ॐ सुवर्णवर्णाय नमः ।
७३८. ॐ हेमाङ्गाय नमः ।
७३९. ॐ वराङ्गाय नमः ।
७४०. ॐ चन्दनाङ्गदिने नमः ।
७४१. ॐ वीरघ्ने नमः ।
७४२. ॐ बिषमाय नमः ।
७४३. ॐ शून्याय नमः ।
७४४. ॐ घृताशिने नम ।
७४५. ॐ अचलाय नमः ।
७४६- ॐ चलाय नमः ।
७४७. ओ अमानिने नमः ।
७४८. ओं मानदाय नमः ।
७४९. ओ मान्याय नमः ।
७५०. ओं लोकस्वामिने नमः ।
७५१. ओं त्रिलोकधृषे नमः ।
७५२. ओं सुमेधसे नमः ।
७५३. ओं मेधजाय नमः ।
७५४. ओं धन्याय नमः ।
७५५. ओं सत्यमेधसे नम. ।
७५६. ओं धराधराय नमः ।
७५७. ओं तेजोवृषाय नमः ।
७५८. ओं द्युतिधराय नमः ।
७५९. ॐसर्वशस्त्रभृतांवरायनमः
७६०. ॐ प्रग्रहाय नम ।
७६१. ॐ निग्रहाय नमः ।
७६२. ॐ व्यग्राय नम ।
७६३. ॐ नैकशृङ्गाय नमः ।
७६४ ॐ गदाग्रजाय नमः ।
७६५. ॐ चतुर्मूर्त्तये नम ।
७६६. ॐ चतुर्बाहवे नम ।
७६७. ॐ चतुर्व्यूहाय नम ।
७६८. ॐ चतुर्गतये नमः ।
७६९. ओं चतुरात्मने नमः ।
७७०. ओं चतुर्भावाय नमः ।
७७१. ओं चतुर्वेदविदे नमः ।
७७२. ओं एकपदे नमः ।
७७३. ओं समावर्तीय नमः
७७४. ओं अनिवृत्तात्मने नम
७७५. ओं दुर्जयाय नमः ।
७७६. ओं दुरतिक्रमाय नम
७७७. ओं दुर्लभाय नमः ।
७७८. ओं दुर्गमाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

७७९. ओं दुर्गाय नमः ।
७८०. ओं दुरावासाय नमः ।
७८१. ओं दुरारिघ्ने नमः ।
७८२. ओ शुभाङ्गाय नमः ।
७८३. ओं लोकसारङ्गाय नमः ।
७८४. ॐ सुतन्तवे नमः ।
७८५. ॐ तन्तुवर्धनाय नमः ।
७८६. ॐ इन्द्रकर्मणे नमः ।
७८७. ॐ महाकर्मणे नमः ।
७८८ ॐ कृतकर्मणे नमः ।
७८९. ॐ कृतगमाय नमः ।
७९०. ॐ उद्भवाय नमः ।
७९१. ॐ सुन्दराय नमः ।
६९२. ॐ सुन्दाय नमः ।
७९३. ॐ रत्ननाभाय नमः ।
७९४. ॐ सुलोचनाय नमः ।
७९५. ॐ अर्काय नमः ।
७९६. ॐ वाजसनाय नमः ।
७९७ ॐ शृङ्गिणे नमः ।
७९८. ॐ जयन्ताय नमः ।
७९९. ॐ सर्वविज्जयिने नमः ।
८००. ॐ सुवर्णविन्दवे नमः ।

८०१. ॐ अक्षोभ्याय नमः ।
८०२. ॐ सर्ववागीश्वरेश्वराय०
८०३. ॐ महाह्रदाय नमः ।
८०४. ॐ महागर्त्ताय नमः ।
८०५. ॐ महाभूताय नमः ।
८०६. ओं महानिधये नमः ।
८०७. ओं कुमुदाय नमः ।
८०८. ओं कुन्दराय नमः ।
८०९. ओं कुन्दाय नमः ।
८१०. ओं पर्जन्याय नमः ।
८११. ओं पावनाय नमः ।
८१२. ओं अनिलाय नमः ।
८१३. ओं अमृताशाय नमः ।
८१४. ओं अमृतवपुषे नमः ।
८१५. ओ सर्वज्ञाय नमः ।
८१६. ओं सर्वतोमुखाय नमः ।
८१७- ओं सुलभाय नम ।
८१८. ओं सुव्रताय नमः ।
८१९. ओं सिद्धाय नमः ।
८२०. ओं शत्रुजिते नमः ।
८२१. ओं शत्रुतापनाय नमः ।
८२२. ओं न्यग्रोधाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

८२३. ओं उदुम्बराय नमः ।
८२४. ओं अश्वत्थाय नमः ।
८२५. ओं चानूरान्ध्रनिषूदनाय०
८२६. ओं सहस्रार्चिषे नमः ।
८२७. ओं सप्तजिह्वाय नमः ।
८२८. ॐ सप्तैधसे नमः ।
८२९. ॐ सप्तवाहनाय नमः ।
८३०. ॐ अमूर्तये नमः ।
८३१. ॐ अनघाय नमः ।
८३२. ॐ अचिन्त्याय नमः ।
८३३. ओं भयकृते नमः ।
८३४. ओं भयनाशनाय नमः ।
८३५. ओं अणवे नमः ।
८३६. ओं बृहते नमः ।
८३७. ओं कृशाय नमः ।
८३८. ओं स्थूलाय नमः ।
८३९. ॐ गुणभृते नमः ।
८४०. ॐ निर्गुणाय नमः ।
८४१. ॐ महते नमः ।
८४२. ओं अधृताय नमः ।
८४३. ओं स्वधृताय नमः ।
८४४. ओं स्वास्याय नमः ।
८४५. ओं प्राग्वंशाय नमः ।
८४६. ओं वंशवर्द्धनाय नमः ।
८४७. ओं भारभृते नमः ।
८४८. ओं कथिताय नमः ।
८४९. ओं योगिने नमः ।
८५०. ओं योगीशाय नमः ।
८५१. ओं सर्वकामदाय नमः ।
८५२. ओं आश्रमाय नमः ।
५३. ओं श्रमणाय नमः ।
८५४. ओं क्षामाय नमः ।
८५५. ओं सुपर्णाय नमः ।
८५६. ओं वायुवाहनाय नमः ।
८५७. ओं धनुर्धराय नमः ।
८५८. ओं धनुर्वेदाय नमः ।
८५९. ओं दण्डाय नमः ।
८६०. ओं दमयित्रे नमः ।
८६१. ओं दमाय नमः ।
८६२. ओं अपराजिताय नमः ।
८६३. ॐ सर्वसहाय नमः ।
८६४. ॐ नियन्त्रे नमः ।
८६५. ॐ नियमाय नमः ।
८६६. ॐ यमाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

८६७ ॐ सत्त्ववते नमः ।
८६८. ॐ सात्त्विकाय नमः ।
८६९. ॐ सत्याय नम ।
८७०.ओं सत्यधर्मपरायणायनमः
८७१. ओं अभिप्रायाय नमः ।
८७२. ओं प्रियार्हाय नमः ।
८७३. ओं अर्हाय नमः ।
८७४. ओं प्रियकृते नमः ।
८७५. ओं प्रीतिवर्धनाय नमः ।
८७६ ओं विहायसगतये नमः ।
८७७. ओं ज्योतिषे नमः ।
८७८ ओं सुरुचये नमः ।
८७९. ओं हुतभुजे नमः ।
८८०. ओं विभवे नमः ।
८८१. ओं रवये नमः ।
८८२. ओं विरोचनाय नमः ।
८८३. ओं सूर्याय नमः ।
८८४. ओं सवित्रे नमः ।
८८५. ओं रविर्लोचनाय नमः ।
८८६. ओं अनन्ताय नमः ।
८८७. ओं हुतभुजे नमः ।
८८८. ओं भोक्त्रे नमः ।
८८९. ओं सुखदाय नमः ।
८९०. ओं नैकजाय नमः ।
८९१. ॐ अग्रजाय नम ।
९२. ॐ अनिर्विण्णाय नमः ।
८९३. ॐ सदामर्षिणे नमः ।
८९४. ॐ लोकाधिष्ठानाय नमः
८९५. ॐ अद्भुताय नमः ।
८९६. ॐ सनान्नमः नमः ।
८९७. ओं सनातनतमाय नमः ।
८९८. ओं कपिलाय नमः ।
८९९ ओं कपये नम ।
९००. ओं अव्ययाय नम. ।
९०१. ओं स्वस्तिदाय नमः ।
९०२ ओं स्वस्तिकृते नमः ।
९०३. ओं स्वस्तये नमः ।
९०४ ओं स्वस्तिभुजे नमः ।
९०५. ओं स्वस्तिदक्षिणाय नमः
९०६. ओ अरौद्राय नमः ।
९०७. ओं कुण्डलिने नमः ।
९०८. ओ चक्रिणे नमः ।
९०९- ॐ बिक्रमिणे नमः ।
९१०. ॐ ऊर्जितशासनाय नमः

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

९११. ॐ शब्दातिगाय नमः ।
९१२. ॐ शब्दसहाय नमः ।
९१३. ॐ शिशिराय नमः ।
९१४. ॐ शर्वरीकराय नमः ।
९१५. ॐ अक्रूराय नमः ।
९१६. ॐ पेशलाय नमः ।
९१७. ॐ दक्षाय नमः ।
९१८. ॐ दक्षिणाय नमः ।
९१९. ॐ क्षमिणांवराय नमः ।
९२०. ॐ विद्वत्तमाय नमः ।
९२१. ॐ वीतभयाय नमः ।
९२२. ॐपुण्यश्रवणकीर्तनाय नमः
९२३. ॐ उत्तारणाय नमः ।
९२४. ॐ दुष्कृतिघ्ने नमः ।
९२५. ॐ पुण्याय नमः ।
९२६. ॐ दुःस्वप्ननाशनाय नमः
९२७. ॐ वीरघ्ने नमः ।
९२८. ॐ रक्षणाय नमः ।
९२९. ॐ सद्भ्य नम ।
९३०. ॐ जीवनाय नमः ।
९३१. ॐ पर्यवस्थिताय नमः ।
९३२. ॐ अनन्तरूपाय नमः ।
९३३. ओं अनन्तश्रिये नमः ।
९३४. ओं जितमन्यवे नमः ।
९३५. ओं भयापहाय नमः ।
९३६. ओं चतुरस्राय नमः ।
९३७. ओं गम्भीरात्मने नमः ।
९३८. ॐ विदिशे नमः ।
९३९. ॐ व्यादिशे नमः ।
९४०. ॐ दिशे नमः ।
९४१. ॐ अनादये नमः ।
९४२. ॐ भूर्भूवाये नमः ।
९४३. ॐ लक्ष्म्यै नमः ।
९४४. ॐ सुवीराय नमः ।
९४५. ॐ रुचिराङ्गदाय नमः ।
९४६. ॐ जननाय नमः ।
९४७. ॐ जनजन्मादये नमः ।
९४८. ॐ भीमाय नमः ।
९४९. ॐ भीमपराक्रमाय नमः ।
९५०. ॐआधारनिलयाय नमः ।
९५१. ॐ धात्रे नमः ।
९५२. ॐ पुष्पहासाय नमः ।
९५३. ॐ प्रजागराय नमः ।
९५४. ॐ ऊर्ध्वगाय नमः ।
९५५. ॐ सत्पथाचाराय नमः ।
९५६- ॐ प्राणदाय नमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

९५७. ओ प्रणवाय नमः ।
९५८. ओं पणाय नमः ।
९५९. ओ प्रमाणाय नमः ।
९६०. ओं प्रणनिलयाय नमः ।
९६१. ओं प्राणभृते नमः ।
९६२. ओं प्राणजीवनाय नमः ।
९६३. ओं तत्त्वाय नमः ।
९६४. ओं तत्त्वविदे नमः ।
९६५. ओं एकात्मने नमः ।
९६६. ओं जन्ममृत्युजरातिगाय०
९६७ ओं भूर्भुवःस्वस्तरवे नमः ।
९६८ ओं ताराय नमः ।
९६९ ओं सवित्रे नमः
९७०. ओं प्रपितामहाय नमः ।
९७१. ओं यज्ञाय नमः ।
९७२. ओं यज्ञपतये नमः ।
९७३. ओं यज्वने नमः ।
९७४. ॐ यज्ञाङ्गाय नमः ।
९७५. ॐ यज्ञवाहनाय नमः ।
९७६. ॐ यज्ञभृते नमः ।
९७७. ॐ यज्ञकृते नमः ।
९७८. ॐ यज्ञिने नमः ।
९७९. ॐ यज्ञभुजे नमः ।
९८०. ओं यज्ञसाधनाय नमः ।
९८१ ओं यज्ञान्तकृते नमः ।
९८२. ओं यज्ञगुह्याय नमः ।
९८३. ओं अन्नाय नमः ।
९८४. ओं अन्नादाय नमः ।
९८५. ओं आत्मयोनये नमः ।
९८६ ओं स्वयञ्जाताय नमः ।
९८७ ओं वैखानाय नमः ।
९८८. ओं सामगायनाय नमः ।
९८९. ओं देवकीनन्दनाय नमः ।
९९०. ओं स्रष्ट्रे नमः ।
९९१. ओं क्षितीशाय नमः ।
९९२. ओं पापनाशनाय नमः ।
९९३. ओं शङ्खभृते नमः ।
९९४. ओं नन्दकिने नमः ।
९९५. ओं चक्रिणे नमः ।
९९६. ॐ शार्ङ्गधन्वने नमः ।
९९७. ॐ गदाधराय नमः ।
९९८ ॐ रथाङ्गपाणये नमः ।
९९९. ॐ अक्षोभ्याय नमः ।
१००. ॐ सर्वप्रहरणायुधायनमः

॥ इति विष्णुसहस्रनामावली समाप्तः ॥

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

ॐ अथ नमोन्ता सप्रणवा श्रीविष्णुसहस्रनामावल्याः

वागीश्वरी व्याख्या

१. विश्वस्मै० चराचरस्य कारणभूतं ब्रह्म शब्दाभिलप्यं यत् यः सर्वमिदं निर्माय स्वयं तत्र विशति। कल्पान्ते च सर्वाविभूतयः यस्मिन् लीना भवन्ति, गुणस्वरूपानिर्वाच्यवैभवादिभिः यः सदा सर्वत्र परिपूर्णः स विश्वशब्देनाभिधीयते तस्मै नमः।

२. विष्णुः-वेवेष्टि विश्वमिति। यः सर्वत्र नैरन्तर्येण एकाकारतया दिक्कालाद्युपाधि रहिततया व्याप्तः यद्वत्तसत्ता साहित्येनात्रसाः इङ्गाश्च प्राणन्ति तस्मै नमः।

३. वषट्कारः- वषट्करणं वषट्कारः यदवाप्तिनिमित्तं यज्ञेषु समस्तदेवताप्यायनार्थं स्वाहाकारस्तान्त्रिकैर्यज्वभिश्चानुष्ठीयते, स्वेच्छया यः सर्वमिदमायत्तीकर्त्तुं समर्थस्तस्मै नमः।

४. भूतभव्यभवत्०— अतीतानागतवर्तमानरूपकालत्रयवर्ति चलाचलात्मकभूतनिवहस्य यः प्रभुः परमेशानस्तस्मै नमः।

५. भूतकृत्—भवन्ति सदाभावविकारसाहित्येनेतिभूताः प्राणिनः तान् ब्रह्मरूपेण सृजति, करोति वेति भूतकृत् तस्मै नमः।

६. भूतभृत्—भवन्ति इति भूतानि जन्तवः, तान् बिभर्ति पालयति विष्णुरूपेणेति सः।

७. भावः—भवतीतिभावः। भवनं वेति भवाः सत्तास्वभावाभिप्रायचेष्टात्मकर्म, इत्यमरः। त्रिकालाद्यवच्छिन्नत्वेन यः सर्वत्र नित्यसत्तारूपेण व्याप्तः।

८. भूतात्मा—सर्वभूतेष्वन्तर्यामितया यः व्यवस्थितस्तस्मै नमः।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

९. भूतभावनः यः सर्वान् सृजति, पालयति संहरति चेति सः तस्मै नमः ।

१०. पूतात्मा—त्रैगुणिकैः तथा जन्मकर्मजैः दोषनिचयैः यः न लिप्यते सः । भवीय फलास्वादविमुखश्च यः स पूतात्मेति निगद्यते

११. परमात्मा—येन भूतान्यात्मवन्ति, यः स्वयं नित्य शुद्ध बुद्ध सच्चिदानन्दं स्वरूपः अन्यानपेक्षितया भूतानामायतिं नियतिं गतिं च वेत्ति सः परमात्मा ।

१२. मुक्तानांपरमा०-रागद्वेषमोहाद्यरिषड्वर्ग संसर्ग शून्या., ब्रह्मसाधर्म्यमाप्ता मुक्ताः तेभ्यः परमां सर्वोत्कृष्टलक्षणां अपुनरावर्त्तनरूपां गतिं ददातीति सः

१३ अव्यय;-उत्पत्ति स्थिति प्रलयादि विकारव्यूहैः यः कालत्रयेणाप्यसंस्पृष्टः, अथ च यः वैकुण्ठान्न वीयते सः न व्येतीत्यव्ययः ।

१४. पुरुषः—नवद्वारे पुरि शरीरे शेते इति पुरुषः । पुरः कृषन् । शरीरमिदं नवद्वारं पुरमस्ति अस्यान्तर्वर्त्तिलिङ्ग शरीरे वसन्नायं कौटस्थ्येन सर्वानभिवीक्षते ।

१५. साक्षी —साक्षात् सर्वद्रष्टा । साक्षाद्द्रष्टरि संज्ञायामितिनिपातनात्साधुः साक्षाच्चैतन्यरूपः । यः प्राणवतां सर्वं शुभाशुभं पश्यतीति सः ।

१६. क्षेत्रज्ञः--क्षेत्राख्यानि शरीराणि तेषां चैव यथासुखम् तानिउपेति स योगात्मा ततः क्षेत्रज्ञ उच्यते गीतायामपि-इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते-
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ।

१७. अक्षर -न क्षरतीत्यक्षरः निस्सीमगुणगौरवशालितया सदा सर्वत्र सर्वैरनुभूयमानोऽपि चिन्मयत्वेन योऽवतिष्ठते. यश्चनिर्विकारः ।

१८. योगायनमः-मुक्तिप्राप्यत्वेन, अथ च जीव ब्रह्मणोरैक्यापादक साक्षात्मोदेनेक हेतुत्वात्, जीवात्मपरमात्मनोः जलगत सैन्धव खण्डवत् यदैक्यं संयोगः।

१९. योगविदांनेता— योगंविदन्ति ये ते योगविदः उपायनिष्ठाः भक्तिनिष्ठाश्च, तेषां नेता-योगक्षेमकृदिति ।

२०. प्रधानपुरुषेश्वरः— प्रधानस्य प्रकृतेः पुरुषस्य च यः ईश्वरः यः बन्धहेतूनां

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

तथा तद्वध्यमाणानां च नियामकः सः ।

२१. नारसिंहवपुः—यः भक्तानां हिताय यथा कामं सर्वाभयदं नृसिंहरूप विभर्त्तीति सः ।

२२. श्रीमान्—विरुद्धाऽऽकारवत्त्वेऽपि यः सर्वमनोहरत्वं बिभ्राणो विराजते

२३. केशवः—के जले क्षीरार्णवात्मके शेत इति । यद्वा- प्रशस्तनील केशत्वा प्रशस्ताः केशाः सन्त्यस्येति केशवः ।

२४. पुरुषोत्तमः—यः क्षरादक्षरादपि सर्वोत्कृष्टत्वेन विराजते सः पुरुषोत्तम

२५. सर्वस्मै—सृतमनेन सर्वमिति । सदसदुत्पत्तिस्थिति संहारकारकत्वे सर्वविग्रहेषु व्याप्तत्वेन योऽवस्थितः स सर्वइत्यभिधीयते ।

२६. शर्वः—अनन्यनिष्ठानां समुपासकानां आवागमनादिरूपं दुःखं यः शृणाति स

२७. शिवः—सर्वेषां यः शुभावहः सः शिवइत्यभिशब्द्यते ।

२८. स्थाणुः—सार्वत्रिकं प्राकृतमप्राकृतञ्चाशिवं संशमय्य शान्तं भ विश्राम्यापि यः स्वयं न विश्राम्यति सः ।

२९. भूतादिः—भूतानामादि सर्वेषां निमित्तकारणम् ।

३०. निधिरव्ययः निधीयतेऽस्मिन् शुभाशुभं कर्मजातमिति, निधेयत्वा य सदाभुज्यमानोऽपि अक्षुण्णतामक्षीणताञ्च बिभर्त्ति, अव्ययश्चा निधिश्चेति ।

३१- सम्भवः—सम्यक्त्वेन समन्ताद् ऽअतिगूढतया निराकारत्वेना साकारतां यो भजते

३२. भावनः—यः भोक्तृभ्यो फलदः, सर्वान् जनित्वोज्जीवयति भावय च सः भावनः ।

३३. भर्त्ता—यः भोक्तृभ्यः फलदः सर्वान् पुष्णाति बिभर्त्ति चेति सः भर्त्ता

३४. प्रभवः—यस्मात् पञ्चमहाभूताः यदीयांशांशकलामादाय अवतीर्ण भवन्तीति सः ।

३५. प्रभुः—प्रकृष्टतया पभवन्त्यस्मादिति निग्रहानुग्रह समर्थत्वात्सर्वेषां प्रभु

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

३६. ईश्वरः—ईष्टे इतीश्वरः स्वयं मनुष्यादियोनिषु अवतीर्णतामवाप्यापि यः ब्रह्मेन्द्रादीनां नियन्ता सः ईश्वरः।

३७. स्वयम्भूः—य स्वयं अन्यनैरपेक्षेण स्वायत्ततया भवति जायते सः।

३८. शम्भुः—यः सर्वेषां प्राणिनां शं-सुखं भावयति सः शम्भुः।

३९. आदित्यः—मार्त्तण्ड मण्डले यः सुवर्णमयः पुरुषो विराजते, यश्च प्रतिमास नामभिर्भिद्यते, ओषधीनां रसञ्चादत्ते सः। आदित्यानामहं विष्णुः।

४०. पुष्कराक्ष—भक्तानुग्रहकारि यस्याक्षिणी निस्तन्द्र पुष्करवत् प्रसादस्मित सुमुखानि वर्त्तन्ते सः पुष्कराक्ष।

४१. महास्वनः—महान् पूज्यः त्रयीरूपः स्वनो यस्येति, नि श्वसितमस्य वेदाः वीक्षितमेतस्य भूतानि। इत्यनुशासनात्।

४२. अनादिनिधनः—आद्यन्तरहितः षड्भाव विकार विवर्जितश्च।

४३. धाता - नाग, कच्छप, वराह सूर्यचन्द्रादि रूपैः संसारस्य धारकः।

४४. विधाता—दर्शपौर्णमासादिकर्मणां यथोचितं फलं विदधातीति सः।

४५ धातुरुत्तमः—यः ब्रह्मादिभ्योऽपि उत्कृष्टत्वेन विराजमानः सः धातुरुत्तमः।

४६. अप्रमेयः—प्रमातुं शक्य प्रमेयः, ब्रह्मादिभिरपि मातुं यः न शक्यते सः।

४७. हृषीकेशः—हृषीकाणां इन्द्रियाणां ईशः। प्रेरकत्वादिति।

४८. पद्मनाभः—सर्व जगत्कारणभूतं कालात्मकं यत् पद्म सः नाभौ यस्येति सः

४९. अमरप्रभुः—न म्रियन्ते इति अमराः देवास्तेषां प्रभुः अधिकारप्रदान-कारित्वादिति।

५०. विश्वकर्मा—ब्रह्मसृष्टेः प्राक् अनन्तरमूर्ध्वञ्च विश्वस्य भवाप्ययादि विषये अन्यानपेक्षः, यः स विश्वकर्मेत्युच्यते।

५१. मनुः—लव'त्रुटि, कला, काष्ठा, निमेष, क्षण, घट्यादि वेलालवानां भवीय योगक्षेमार्थं मननान्मनुरित्यभिधीयते। मन्त्ररूपत्वादपि मनुः। मन्त्रमयी देवतेति तान्त्रिकाः।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५२. त्वष्टा—सं वर्त्तकाले सृष्टस्य सूक्ष्मतां सम्पाद्य यः स्वस्मिन्निवेशयति सः।

५३. स्थविष्ठ.—अतिशयेन य सर्वेभ्योऽपि स्थूलः सः स्थविष्ठः।

५४. स्थविरः—कालानायत्ततया यः सर्वकाल अविकारतया वैलक्षण्येन विराजते।

५५. ध्रुवः—या सच्चिदानन्दघनत्वरूपात्स्वस्वरूपात् सदा केनापि अप्रच्याव्यः स ध्रुव इत्यभिशब्द्यते : ध्रुव स्थैर्ये।

५६. अग्राह्यः— यः इन्द्रियैरनधिष्ठेयः, सर्गस्थित्यन्तसंयमाः यदीयं महिमान वर्णयितुं न प्रभवन्ति, सः, अतएवोक्तम्–जानन्तोऽपि बहवो यं न विदुः।

५७. शाश्वतः—शश्वदित्यव्ययं सदातनार्थाभिधायि। यः सदा अव्याहृत-प्रवाहः, सर्वकालेऽपि विकारमनुपयन् विभासते सः शाश्वतः।

५८. कृष्ण –"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
विष्णुसद्भावयोगाश्च कृष्णो भवति शाश्वतः" य सत्तारूपः सुखरूपश्च स, कृष्ण इति।

५९- लोहितेति –लोहिते अक्षिणी यस्य, रक्तराजीवनेत्रत्वादिति।

६०. प्रतर्दनः –प्रतर्दयति प्रलयेसर्वानिति, "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनम् मृत्यर्यस्योपसेचनंकइत्था वेद यत्र सः, इत्युपनिषत्"। तृदीहिंसायाम्, ल्युट्।

६१. प्रभूतः—अणिमादि सर्वैश्वर्य सम्पन्नः। निस्सीमभोगोपकरण समृद्धः।

६२. त्रिककुदिति— पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि, त्रिपादूर्ध्व-उदैत्पुरुषः, इति पुरुषसूक्ते आम्नानं, त्रिपाद्विभूतिरेव त्रिककुत्, सैव धामस्थानं यस्य, यद्वा-युगत्रयीयधर्मवत्वे नापि अस्यत्रिकुब्धामत्वं अनवद्यम्

६३. पवित्रमितिः—मन्त्रर्षिदेवतारूपेण यः सर्वान् अघौघात् पवित्री करोति सः

६४. परमङ्गलः—अनन्तानन्द लक्षणं, सर्वहेम प्रत्यनीकं, वेदान्तेवद्यं नित्यंयत्तत् परममंगलम्।

६५. ईशान.—य. सर्वस्यईष्टे, सर्वावस्थास्वपि एकरूप, चिन्मात्र स ईशानः।

६६. प्राणदः—चराचरात्मके विश्वे सर्वेषां प्राणदातृत्वात् प्राणदः इत्युच्यते।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

य: प्राणान् द्यति:—खण्डयति महामृत्युरूपेणेतिवा । दो अवखण्डने ।

७. प्राण:—प्रकर्षेण अनिति चेतनादायित्वेन सर्वानिति नराणां प्राज्जीवन निमित्तत्वात प्राण. इति ।

८. ज्येष्ठ –अतिशयेन अदृष्टाधार विभूतितृपा प्रशस्य ज्येष्ठ. अत्रातिशायन रूपेऽर्थे इष्ठन् प्रत्यय: प्रशस्यस्य च ज्यादेश ।

७९. श्रेष्ठ —अत्रा'प अतिक्षयेन प्रशस्य: श्रेष्ठ: अत्र क्षादेश: ।

७०. प्रजापति:—य ईश्वरोभूत्वा ब्रह्मादिस्तम्ब पर्यन्तानां पति. पालक: ।

७१. हिरण्यगर्भ:—सुवणमयाण्डान्तरवासा । सृष्टयादौ भगवान् स्वीयते-तेजोमय वीज अप्सु अवासृजत् तदण्डमभवद्धम सहस्राशु समप्रभम् । तस्मिञ्जज्ञे स्वयब्रह्मा सर्वलोकपितामह. इत्यवसयम् ।

७२: भूगर्भ अखिलाधारभूता वसुमती यस्य गर्भ वर्तति स: भूगर्भ इत्युच्यते ।

७३. माधव:—माया: लक्ष्म्या: पति इति माधव.

७४. मधुसूदन:—मधुनामक दत्य सूदयति नाशयति इति ।

७५. ईश्वर -सर्वशक्तिमत्वेन ईशनाद् सर्वत्र रमणाच्च ईश्वर. । सपेशभास पिसकसो यरच् ।

७६. विक्रमी—विक्रम: अनुपम. पौरुष तदस्यास्तीति विक्रमी ।

७७. धन्वी—अनन्यपौरुषानुगं शार्ङ्गं धनु. य विभर्त्ति स: ।

७८. मेधावी—निस्सीमभूमा गुणनिवहाञ्चिता नित्यसार्वज्ञलक्षण लक्षिता धारणावती धी: मेधा, सा अस्यास्तीति- 'अस्मायामेधास्रजोविनि: ।

८९. विक्रम:—विशिष्ट सर्वोत्कृष्ट: क्रम: पादविक्षेपोयस्य, विराट्रूपेण त्रिषुलोकेषु येनक्रम: समकृतस: । यद्वा-वि: पक्षीगरुड:-वाहनं यस्येति ।

८०. क्रम:—क्रमणात् क्रम हेतुत्वाच्च क्रम नाम्ना उदाहृत. ।

८१. अनुत्तम:—विभूति ततिनीराजित पदपयोजतया नास्त्यन्य: उत्तमो यस्मादिति स अनुत्तम: ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

८२. दुराधर्षः—अकूपारवदक्षोभ्यः, दुर्विज्ञेय गतिश्च यः स दुराधर्षः ।

८३. कृतज्ञः – समस्त प्राणि कृत शुभाशुभकर्मणां यः ज्ञाता, स कृतज्ञ ।

८४. कृतिः—क्रिया, प्रयत्नं वा, सर्वस्मिन् पुरुषार्थरूपः ।

८५. आत्मवान्–सर्वदा स्वीयानन्त महिम्नञ्चैवाधिष्ठानादात्मवत्वे यस्य सः

८६. सुरेशः—सुरन्ति इति सुदाः देवाः, ईष्टे इति ईशः, सुराणामीशः सुरेशः

८७. शरणं —प्रपन्नानामार्त्तानां आर्त्तित्वेन यः रक्षक. स. ।

८८. शर्म—परमानन्द रूपत्वात् हिंसादिराहित्याच्च परम महामंगलायनम्

८९. विश्वरेताः—जगतः कारणत्वेन विश्वं-जगत् भगवतः रेतो रूपेणवर्त्ततेइ

९०. प्रजाभव -अग्ने स्फुलिङ्गा इव समस्ताः प्रजाः यस्माज्जायन्ते स प्रजाभव

९१- अहुः—प्रकाशरूपवासरवत्, यद्वा-यस्मिन् हीनत्वं नास्ति सः ।

९२. संवत्सरः—संवसन्ति सर्वाः प्रजाः कालचक्रात्मके यस्मिन्निति सः ।

९३. व्यालः—फणिराज इव यः सर्वशत्रु भयंकरः, व्यालोमत्तेगजे सर्पे इति ।

९४. प्रत्ययः —प्रत्येतीनि प्रत्ययः प्रतीतिरूपः, य सर्वान् स्वरोचिषा प्रत्याय यति सः प्रत्ययः ।

९५. सर्वदर्शनः—यः भूतेभ्यः स्वीयं सर्वसहं महिमानं दर्शयति स सर्वदर्शनः

९६. अज —जन्मरहितः । षड्भूमिसम्पर्क विवर्जितः ।

९७. सर्वेश्वरः यः सर्वेषां ईश्वराणामपीश्वरः स सर्वेश्वरः ।

९८. सिद्धः—स्वरूपेणैव सिद्धत्वात् सिद्ध इत्युच्यते बुधैः ।

९९. सिद्धिः–सर्वस्मिन् जगति यश्चैतन्य रूप, स्वर्गाद्युत्तममोक्षरूपफलदात

१००. सर्वादिः– यः सर्वेषां पुरुषार्थानां आदिः-मूलं स सर्वादिः ।

१०१. अच्युत. न कुत्रापि त्रिषुलोकेष्वपि च्यवनं यस्येत्यच्युतः ।

१०२. वृषाकपिः - धर्मरूपः, अचार्ये कपिर्वराहः श्रेष्ठञ्च धर्मश्च वृष उच्यते तस्माद वृषाकपिः प्रोक्तः सर्वतन्त्रेषु निश्चितः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

१०३. अमेयात्मा —यः इयत्तया केनापि परिमातुमशक्यः, सर्वतोऽधिकत्वादिति

१०४. सर्वेतिः—सर्व सम्बन्ध विधुर, सर्वरुपायैः प्राप्यश्च यः स सर्व-योगविन सृत ।

१०५. वसु —यः सर्वेषु वसति, यस्मिन् भूतानि क्षियन्ति स वसुः ।

१०६. वसुमना —रागद्वेषादिभिः, तथा मानमदमोहादिभिः क्लेशोपक्लेशैः यस्यमनः अस्पृष्टं वर्त्तते सः वसुमनाः इति ।

१०७. सत्यः—सत्सुसाधुः सत्यः, यः सर्वदानित्यत्वेन भावविकारैरबाधितः ।

१०८. समात्मा: -रागादि राहित्यात् यः सदा समचित्तः ।

१०९. समः—यः सर्वदा विकार रहित । रागादि शून्यः ।

११०. अमोघः—स्मरणमात्रेणैव फलदः, वितथस्पर्श रहितः ।

१११. पुण्डरीकाक्षः पुण्डरीकं-सिताम्भोजं, तद्वत् अक्षिणी यस्य, यद्वा पुण्डरीक शब्दः वैकुण्ठ वाचकोऽपि, तत्राव स्थिता ये मुक्ता प्राणिन--स्तेषामक्षिभूतः ।

११२. वृषकर्माः - श्रेयस्करं धर्मरूपं कर्म यस्येति सः ।

११३. वृषाकृतिः - तापत्रयाग्निदग्धानां आप्यायनाय सुधेवात्यन्तशीतलं रूपं कर्म च यस्यास्ति सः वृषाकृतिः ।

११४. रुद्रः—संहार काले यः सर्वान् रोदयति, यद्वा 'रु दुःख दुःखहेतुं च विद्राव यति य प्रभुः रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ।

११५. वहुशिराः अनन्तशिराः । अनन्तफणामणि मण्डलो परिइलाया. सत्वात्

११६. बभ्रुः—बिभर्ति धारण पोषणादिना विश्वमिति सः बभ्रुरुच्यते ।

११७. विश्वयोनिः—विश्वेषां सर्वजगद् विभूतीनां योनिः आदि कारणम् ।

११८. शुचिश्रवाः—परमपुनीत सुगृहीत नामधेयः ।

११९. अमृतः—जरामरणादि बिकार व्यामोह वियुक्तः ।

१२०. शाश्वत.—स्थाणुः-यः स्वयं सदा नित्यः शुद्धो वुद्धो निरञ्जनश्चेति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

१२१. वरारोहः—वरे सर्वोत्कृष्टं आरोहः उत्संगो यस्य, यस्याङ्कगताः न कदापि निवर्त्तन्ते इति। न स पुनरावर्त्तते २ इति निदर्शनादिति।

१२२. महातपाः - महत् पूज्येतपः- ज्ञानं यस्येति सः महातपाः।

१२३. सर्वगः—यः कारण रूपेण व्यापकत्वेन च सर्वत्र गच्छति स सर्वगः।

१२४. सर्ववित्:—यः सत्य संकल्पकतया त्रैकालिकं ज्ञानं वेत्ति सः सर्ववित्।

१२५. भानुः—यः सर्वज्ञः सर्वेषां प्रकाशक, सर्वत्र स्वभासा विभाति सः भानु।

१२६. विश्वक्सेनः--विषु इत्यव्ययं समन्ताद् वाचकं, विषु-समन्ताद् अञ्चन्ती सेना यस्येति, सः विष्वक्सेनः

१२७. जनार्दनः—भक्त विद्वेषिणः जनान् अर्दयति स्वमहिम्नेति स जनार्दनः।

१२८. वेदः—अखिलज्ञान विज्ञान योनित्वाद्वेद इत्युच्यते।

१२९. वेदवित्:—वेदार्थं यः वेत्ति, सर्ववैशिष्ट्यं सः वेदवित्।

१३०. अव्यंगः—शिक्षादिभिरंगै र्यः न हीनः स अव्यंगः। यः हीनः सव्यंगः।

१३१. वेदांगः—यस्यांगेभ्यो वेदाः समुत्पन्नाः, स वेदांगः।

१३२. कविः—ऐन्द्रियक शक्त्यायद् द्रष्टुं न शक्यते, क्रान्तदर्शित्वेन यः तस्यापि द्रष्टा।

१३३. लोकाध्यक्षः—लोक्यंते इतिलोकः- भुवनानि, तेषामध्यक्षः।

१३४. सुराध्यक्षः—सुराणां देवानामध्यक्षः।

१३५. धर्माध्यक्षः—धर्माधर्मयोरध्यक्षः, तथा तत्फलदाता चेति सः।

१३६. कृताकृतः कार्यकारणरूपौ प्रवर्त्तकौ यस्य स्वरूपं सः कृताकृतः।

१३७. चतुरात्माः—वासुदेव प्रद्युम्न संकर्षणानिरुद्धादि भेदैः चतुरात्मत्वाच्च तुरात्मेति कथ्यते।

१३८. चतुर्व्यूहः—जाग्रत्स्वप्नसुषुप्त्यादि भेदैश्चत्वार, व्यूहा-विभामा यस्येति।

१३९. चतुर्दंष्ट्रः—श्री नृसिंहरूपे दंष्ट्रा चतुष्क युक्तत्वाच्चतुर्दंष्ट्र इत्युच्यते।

१४०. चतुर्भुजः—महापुरुषरूपत्वेनान्यविलक्षण बाहुचतुष्टयैः सदायुक्तत्वात्

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

१४१. भ्राजिष्णुः—सदास्वयं स्वप्रकाशः ।

१४२. भोजनः—भोज्यरूपामायैव यस्य भोजनं, मायां तु प्रकृतिं विद्यात् आपिर्नतु महेश्वरम् ।

१४३ भोक्ताः—पुरुषरूपेण मायोपभोक्ता ।

१४४ सहिष्णु—स्वभक्तै निर्मर्यादमनुष्ठिताना एनसां स्वकृपाञ्चित दृष्टया क्षमापन द्वारा य सर्वं सहते स सहनशीलः सहिष्णुः ।

१४५. जगदादिजः—जगतामादौ यः विष्णुरूपेण प्राकट्यमाप सः ।

१४६. अनघः-पापप्रतिस्पर्धितया सर्वव्यसनरहितः, नास्त्यघं पापो यस्येति अनघः

१४७. विजयः—जगज्जयी, ज्ञानवैराग्यैश्वर्यादिगुणैः यः जगतां जेता सः विजयः

१४८. जेताः—स्वभावेनैव सर्वेषां स्वाभिप्राये स्थापयिता जेतेत्युच्यते ।

१४९ विश्वयोनिः-विश्वस्य चराचरात्मक ब्रह्माण्ड पिण्डस्य योनिः आदिकारणम्

१५०. पुनर्वसुः—पौनः पुन्येन जीवरूपेण यः सर्वान्तर्यामितया सर्वेषु वसति सः पुनर्वसु ।

१५१. उपेन्द्रः—इन्द्रस्यानुजातत्वात्, गोलोकस्य इन्द्रत्वाच्चेति सार्थकनाम ।

१५२. वामनः—त्रिविक्रमणेनैवसत्र व्याप्तत्वेन, खर्वाकृतिमदवतारधारणाच्चेति वामनः ।

१५३. प्रांशुः—वलि सभायां गगन चुम्बिविराट् रूपदर्शनादस्य प्रांशुत्वम् ।

१५४. अमोघः—मानातीत प्रभावत्वाद्यस्य व्यापारः सर्वत्र सफलः स अमोघः ।

१५५. शुचिः—यस्य स्मरणमात्रेणैव पापनाशे सति पवित्रता प्राप्तिः सः ।

१५६. अर्जितः—अर्जा-वलं यस्य नित्यमनातङ्कितं जातं सः अर्जितः । इतच् प्रत्ययः ।

१५७. अतीन्द्रः—अनुपमा तुलित वैभवेन यः इन्द्रमप्यतिशेते स अतीन्द्रः ।

१ ८. संग्रहः—संहारकाले जगज्जालं संहृत्य यः स्वान्त. समावेशयति । संगृह्णातीतिवा ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

१५९. सर्गः—अखिल सृष्टि कारणभूतः। अन्यनैरपेक्ष्येन सृजनशीलः।

१६०. धृतात्माः—येन संसरण स्वभावाः आत्मानः सतित्येन धृताः सधृतात्मा।

१६१. नियमः—नियमात्-स्वस्वाधिकारे स र्वेषां प्रतिष्ठापनात् नियम इत्युच्यते

१६२. यमः—यमनात्-सर्वेषां हृदये संविश्य तेषां चस्व कार्येषु संलग्नी काराद्यमः

१६३. वेद्य —सौलम्याद् यः सर्वेवेदितु शक्यः, विशेषाच्च मोक्षार्थिभिः।

१६४. वैद्यः-वेदितृणां ज्ञानवतांभवरोग निवारिणीं विद्यां यः अधीते वेद वा सः वै

१६५. सदायोगीः— सदा आत्मज्ञाने य. जागरूकः स सदायोगीति कथ्यते।

१६६. वीरहाः—धर्मसेतु संहारकाः ये दुष्कृतिनस्तान् हन्तीति सः वीरहा।

१६७. माधवः -- मा-ब्रह्मविद्या, तस्याः धवः पति माधवः।

१६८. मधुः—अमृतरसाति शायि आनन्ददायकत्वात मधुरित्यन्वर्थकं नाम।

१६९. अतीन्द्रियः— ज्ञानोपकरणव्रातं यः अतिक्रान्तः स अतीन्द्रिय।

१७०. महामायः—शरणं अप्रपन्नानां यस्यमाया मोहयति, गर्त्तेपातयति सः।

१७१. महोत्साहः —जगदुत्पत्ति स्थिति प्रलयादिषु यः महान्ते उत्साहं बिभर्त्तिसः महत् उत्सहनं यस्येति वा।

१७२. महावल —सर्गविधौ यः कर्त्रन्तरानपेक्षः सः महावलः।

१७३. महाबुद्धिः—महत्ज्ञानं, स्वरूपं, महती च बुद्धिर्यस्य सः।

१७४. महावीर्यः कारणवशाद्विकारित्वेऽपि अविकारित्व लक्षणं महद्वीर्यं यस्य स महावीर्यः।

१७५. महाशक्तिः—महती अनितर सहजा शक्तिः सामर्थ्यं यस्य सः।

१७६ महाद्युतिः—चन्द्रार्कादि तेजोभ्यः अनमेक्षरूपा महतीद्युतिर्यस्मेति सः।

१७७. अनिर्देश्यवपुः—उपमानविवर्जितं ज्ञानादिमयं तेजिष्ठं वपुरस्यास्तीति सः

१७८. श्रीमान्:--दिव्यसम्पन्निचय नीराजित पादपीठः।

१७९. अमेयात्माः—अकूपारइवागाध भाव भावितात्मा।

१८०. महाद्रिधृक्:—मन्दरगोवर्धनादीन् महीध्रान् यः धृतवान् सः।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

१८१. महेष्वासः —प्रचण्डशार्ङ्ग कोदण्डमण्डितत्वेन महेष्वासः इत्युच्यते।

१८२. महीभर्ता —चराचरात्मक ब्रह्माण्डपिण्डस्य धारक पालकश्चेति।

१८३. श्रीनिवासः—यस्योरसि स्वर्णरेखा लक्षितालक्ष्मीः वसति सः।

१८४. सतांगतिः—शरणं प्रपन्नानां प्रणतानां यः प्रियकरः सः सतां गतिरिहोच्यते

१८५. अनिरुद्धः —निस्सीमचेष्टयुक्तत्वेन यः केनापि निरोद्धु न पार्यते इति।

१८६. सुरानन्दः —सुराणामानन्ददायित्वात्सुरानन्दः स्मृतोबुधैः।

१८७. गोविन्दः —वराहरूपं धृत्वाधरित्रीधारकः, यद्वाः गावः वेदगिरः तेषांवित्दः प्रापकः, यश्च गवां इन्द्रः स गोविन्दः।

१८८. गोविदांपतिः —वेदविद्यावतां पतिः पालकः।

१८९. मरीचिः—तेजस्विषु सर्वोत्कृष्टतया विनष्टदृग्म्योऽपि प्रकाशिता च स्वरूपः।

१९०. दमनः —प्रमत्तानां यमादिरूपेण दण्डनात् दमनाच्च दमनः

१९१. हंसः—सोहमस्मीत्या कारक भावना वतां यः मोक्षदाता।

१९२. सुपर्णः —सर्वेषां अन्तर्वर्ति दहराकाशेस्थितत्वात्। शोभनयर्णत्वाच्चेति।

१९३. भुजगोत्तमः —शेष वासुकि रूपेण यः भुजगेषूत्तमः।

१९४. हिरण्यनाभः —हिरण्यवत् मनोहारिणी नाभिर्यस्येति सः।

१९५. सुतपाः —बदरिकाश्रमे नरनारायण रूपेण ज्ञानरूपोत्तम तपकर्त्रे नमः।

१९६. पद्मनाभः—पद्मनाभौयस्य, पद्मपुष्पवद्वर्त्तुला नाभिर्यस्येति वा, हेममय दिव्यकर्णिकायाः यस्यनाभितः समुत्पत्तिः स पद्मनाभः।

१९७. प्रजापतिः—ब्रह्ममुखाः प्रजास्तेषां तासां वा पतिः पालकः।

१९८. अमृत्युः—यस्य त्रासेन मृत्युः सदाधावन्नास्ते, यः सर्वमृत्यु निआरणः।

१९९. सर्वदृक्ः—सर्वान् शत्रुमित्रोदासीनान् यथोचितं पश्यति स।

२००. सिंहः—अमित्र करिणां निष्पेषेण भीषणः सिंह इत्युच्यते।

२०२. सन्धाताः—सर्वप्राणि कृतकर्मणां पूर्णफलदात्रे नमः।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

२०१. सधिमतन्:—जीवरूपत्वेन कर्म फलोपभोक्ता। भक्तैः सह नित्यं सन्धिर्यस्येति सः।

२०३. स्थिरः—महोपसर्गरूप बिप्लव वीचीभिः यः अविचाल्यः।

२०४. अजः—अजन्मा। यः इतरवत् न जायते।

२०५. दुर्मर्षणः—दुष्करं-दुःसहं मर्षणं परैर्यस्येति स दुर्मर्षणः।

२०६. शास्ताः—धर्मद्रुहः सर्वान् कण्टकान् शस्ति स शास्ते त्युच्यते।

२०७. विश्रुतात्मा—यस्य सैहं अपदानकं देवै रन्यैश्च विस्मयेनश्रुतं सः विश्रुतामा

२०८. सुरारिहा—हिरण्यकशिपु प्रमृतीनांसुरारीणां हन्तृत्वात्सुरारिहा।

२०९. गुरु—सर्वविद्योपदेष्टा। अखिलविद्याचार्यत्वात्।

२१०. गुरुतमः—ब्रह्मादिभ्योऽपि ब्रह्मविद्याप्रदायकः।

२११. धाम—यश्चराचर ससारस्याधारभूतः।

२१२. सत्यः—जगति यद्दृश्यते तदन्तरा परम सत्स्वरूपेण यः विभाति स।

२१३. सत्यपराक्रम य सदासत्यं नित्यं च पराक्रमं बिभर्ति सः।

२१४. निमिषः—योगनिद्रया अक्षिस्पन्द रहितः।

२१५. अनिमिषः—नित्यशुद्धबुद्धप्रबुद्ध स्वरूपः।

२१६. स्रग्वीः—नित्यं वैजयन्ती स्रजोयोगात् स्रग्वीति प्रोच्यते बुधैः।

२१७. वाचस्पतिः—वेदोपवृंहणत्वेन वाचांपतिः वाचस्पति सः।

२१८. उदारधीः—सर्वोपजीव्यतया उदाराधीर्यस्येति स।

२१९. अग्रणीः—मुमुक्षून् उत्तमें मोक्षरूपं फलं प्रदाय यः अग्रंश्रेष्ठं पदंनयतीति सः

२२० ग्रामणीः-स्वेदजाण्डज पिण्डजोद्भिदादि रूप चतुर्विधभूत ग्रामस्य नायकः

२२१. श्रीमान्:—सर्वाधिक शोभाति शाथि स्वरूपाञ्चितः।

२२२. न्यायः—प्रमाणपूर्वकं तर्काश्रयेन यस्यज्ञानं भवेत्। प्रमाणैः वस्तुपरीक्षणं न्याय गौत्तमादि प्रणीतं तर्कशास्त्रम्।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

२२३. नेता—यः विश्वमात्रस्याखिल उत्पत्तिस्थिति प्रलयादि निर्वाहकः ।

२२४. समीरणः--प्राणवायु स्वरूपेण यः सर्वान् समीरयति प्रेरयति ।

२२५. सहस्रमूर्धा. सहस्रशब्दः आनन्त्यवाचकः. अनन्तशिरस्कः ।

२२६. विश्वात्मा—ज्ञानकर्मभ्यां विश्वस्मिन् व्यापनात् विश्वात्मा ।

२२७. सहस्राक्षः—अनन्तज्ञानकर्म सम्बन्धिगौरवोपेतत्वात् सहस्राक्षः ।

२२८. सहस्रपात्:—असंख्या. पादाः किरणाः यस्येति सः ।

२२९. आवर्त्तनः—संसाररूप घटीयन्त्रे परिवर्त्तन शीलतया यः सर्वान् । चक्रवत् भ्रामयति-अवर्त्तयति स आवर्त्तनः स्मृतः ।

२३०. निवृत्तात्मा --यस्यात्मा नाम स्वरूप संसार वन्धनाद्वि मुक्त ।

२३१. संवृतः —सम्यक् तया मोहिन्या मायया यः संवृतोऽपि भस्मपिहिताग्निरिविराजते स संवृतः ।

२३२. सम्प्रतर्दनः—विद्याबलेन यः अज्ञानान्धतमसं सम्यकप्रकर्षेण तर्दयतिनाशयति सः ।

२३३. अहः संवर्त्तकः—अहर्लक्षित कालस्य तत्परिवृत्तेश्चैकमात्र साधनत्वादहः संवर्त्तक ।

२३४. वह्निः—सर्वकालं विश्वस्य वहनात्, यद्वा अग्निरूपो भूत्वा देवताभ्यः आहुतिप्रापकः ।

२३५. अनिलः —वायुरूपो भूत्वा निर्लेपत्वेन अस्पृष्टपुण्यपापः ।

२३६. धरणीधरः —वराहरूपेण धरणेर्धारणाद् धरणीधर इत्युच्यते ।

२३७. सुप्रसादः-शोभनः शत्रुमित्रादि पक्षपात रहितः प्रसादः प्रसन्नता यस्य,सः

२३८. प्रसन्नात्मा:-सम्प्रति सर्वकामत्वाद् यस्यमनः रागादि दोष रहितं वर्त्तते सः

२३९. विश्वधृक्:--ज्ञान वैराग्यादि सर्वैश्वर्य सम्पन्नतया विश्वं तुच्छमितिज्ञात्वा यः धर्षयति ।

२४० विश्वभुकः—कल्पान्ते यः विश्वंभुनक्ति महाकाल रूपेणेति सः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

२४१. विभुः—विभवति विविधरूपविधाभिः, अतएवोच्यते-अनेक रूपरूपाय विष्णवे नमः ।

२४२. सत्कर्ताः—सत्करोतीति, सज्जनप्रतिपूजकं त्वाद्, इतरेषां क्षयकारित्वाः

२४३. सत्कृतः—यः सर्वैः पूजितः यं कारवोऽपि विश्वकर्मेत्युवासते ।

२४४. साधुः—साध्नोति इति परोपकार प्रवणः । लोकवेदानुकूलाचरण वानिति

२४५. जह्नुः—संहारकाले सर्व संहार कारणत्वात् आत्मनिह्नुति कारणाच्च-जह्नुरिति ।

२४६. नारायणः—नराज्जातानिभूतानि नारागीति विदुर्बुधाः ।
तान्येव चायनं तस्य तेन नारायणः स्मृतः ॥
नारे-जले अयनं निवासः यस्येति सः ।

२४७. नरः—रकारः क्षयवाचकः, यस्यक्षयोनास्ति सः नरः ।

२४८. असंख्यातु अशक्ता विभूतयो यस्य, संख्यातीते त्यपि ।

२४९. अप्रमेयात्माः—यद्रूपस्य यथार्थं ज्ञानं दुर्लभं सुकरञ्चेति ।

२५०. विशिष्टः—अन्यानपेक्षत्वेन यः सर्वविलक्षण; सर्वोत्कृष्टश्चेति ।

२५१. शिष्टकृतृ—शब्दतत्व साक्षात्कारवन्तोयोगिनः शिष्टाः, तेषां वालकः ।

२५२. शुचि—मायामोह रहित ।

२५३. सिद्धार्थ—सिद्धा प्राप्ता समस्तार्था येन सः अवाप्तसर्वकामः ।

२५४. सिद्धसंकल्पः—सदा सर्वत्र सत्यसंकल्पवत्वात् सिद्धसंकल्प ।

२५५. सिद्धिदः-यः प्रसन्नो भूत्वा भक्तेभ्यः अणिमाद्यष्ट सिद्धीनां दानं करोतीति सः

२५६. सिद्धिसाधनः—सिद्धीनां प्रप्तये भगवनः परमहेतुत्वात् सिद्धिसाधनः ।

२५७. वृषाहीः—वृष धर्मः अहः- प्रकाशरूपेदिवः, उभयोरनयोः अपकर्त्ता भोक्ताचेति ।

२५८. वृषभः—भक्तकामनां अभिवर्षणात्, सर्वेच्छा परिपूरणात् वृषभः ।

२५९. विष्णुः—वेवेष्टि विश्वमिति ।

२६०. वृषपर्वाः—वर्णाश्रम धर्मा; वृषाः, ते यत्पदारोहणे पर्वरूपाः सः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

२६१. वृषोदरः—सर्वाः प्रजाः यस्योदरदरीतः समुद्भूताः स वृषोदरः ।

२६२. वर्धनः—यः भक्तान् स्वयं प्रसूवंद्वधुयति पालयतिच च सः ।

२६३. वर्धमानः—यः स्वयं वर्धयन् भक्तानपि वर्धयति सः वर्धमानः ।

२६४. विविक्तः-गुणवृंहितत्वात्, सर्वपावन त्वात्, लोकोनर माहात्म्यशालित्वाच्च

२६५. श्रुतिसागरः-श्रुतीनांसागर इव, यस्मिन् सर्वाश्रुतयः विश्रमन्ति , सर्वेवेदा यत्पदमाममन्ति ।

२६६. सुभुजः—प्रपन्नार्त्तिहराः सुन्दराः भुजाः यस्येति स. ।

२६७. दुर्धर —अन्यैर्धर्तुमशक्यः, दुर्वारवेगवत्वादिति ।

२६८ वाग्मीः—वेदलक्षण वक्तृत्वात यः वाचोयुक्ति पटुः स, वरचोमिमिः ।

२६९. महेन्द्र -महांश्चासौइन्द्रः, परमैश्वर्यवत्वादिति ।

२७०. वसुद —सर्वेभ्यः वसुदानात् वसुद ।

२७१. वसु —सर्वत्र बसनाद्, सर्वेषां वा वासनात् वसुः ।

२७२. नैकरूपः-नास्ति एकं रूपंयस्य अनेकरूपरूपितत्वादिति । सर्वप्रत्ययगोचरत्वात

२७३. वृहद्रूप—वृहद् सर्वव्याप्नुवद्रूपं यस्य सः ।

२७४. शिपिविष्टः—शिपिरिति पशुनामतस्मिन् प्रविष्टः यज्ञपशुरूपः ।

२७५. प्रकाशनः—प्रकाशयतिसर्वान् स्वभासेति प्रकाशनः ।

२७६. ओजस्तेजोद्युतिधरः-असाधारण सामर्थ्यं ओजः, पराभिभवशक्ति मत्वंतेजः द्युतिः औज्वल्यं, यस्तानि सर्वदा धते सः ओजस्तेजोद्युतिधरः ।

२७७. प्रकाशात्माः—प्रकाशरूपा मूर्त्तिर्यस्य सः ।

२७८. प्रतापनः—मार्त्तण्ड रूपेण यः संसारं प्रतापर्यति, तीक्ष्णभावत्वादिति ।

२७९. ऋद्धः— धर्मज्ञानैश्वर्यौदार्यादिगुणपरिपूर्णः ।

२८०. स्पष्टाक्षरः —स्पष्टः शंकारहितः प्रणवरूपोऽक्षरो यस्य । प्रणवस्य सर्वत्र-नुपमानत्वात् ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

२८१. मन्त्रः—मननात् मन्त्रः, मन्तारं त्रायते इति वा, त्रय्युक्त मन्त्रैरेव यस्यज्ञानं भवति ।

२८२. चन्द्रांशुः—भवसन्ताप तप्तानां चन्द्रकिरणौघवत् आह्लाद कत्वात् चन्द्रांशु

२८३. भास्करद्युतिः—परप्रभावाभिभवन लक्षणद्युतिमत्वाद् भास्करद्युतिरिति।

२८४. अमृतांशूद्भवः मृतसञ्जीवन कारित्वात् अमृत रूपा अंशवो यस्य सः अमृतांशुश्चन्द्रः तस्यापि तज्जात त्वांद्युक्तमेतन्नाम ।

२८५. भानुः—भातीति भानुः सदाप्रकाशमानः ।

२८६. शशविन्दुः —शशः-प्लुतगतिः मृगः विन्दुश्चिह्नं यस्य सः शशविन्दुश्चन्द्र। तद्वत् प्रजापोषकः ।

२८७. सुरेश्वर —सुराणां सुन्दर फलदात्रीणां देवानामीश्वरः ।

२८८. औषधं —भवीयप्रखर विषातुराणां दुःखहन्त्रित्वेन परमौषधरूपः ।

२८९. जगत सेतुः—जगदर्णवा त्पारगत्वमीहमानानां भक्तानां कृते सेतुवद्रक्षकः।

२९०. सत्यधर्मपराक्रमः—यस्य सत्याः वैतथ्यरहिताः धर्माः गुणाः स्वभावाः पराक्रमा चेष्टितानि निर्व्यलीकानि सः ।

२९१. भूतभव्यभवन्नाथः— कालत्रयाधीशः ।

२९२. पवनः—पुनातीति पवन । सर्वपवित्र कारकः ।

२९३. पावनः —यः लोकपावनान् गङ्गादितीर्थानपि पावयति सः लोकपावनः

२९४. अनलः—यः भक्तेभ्यः अनं-अनुग्रहं लाति ददाति सः, लातेर्दानार्थकत्व मपिचन्द्रमतेन ।

२९५. कामहा —स्वभक्ताना मन्तर्वर्त्ति वैषयिक कामनानां हन्ता ।

२९६. कामकृत् —भक्तानां अपुनर्भवीया या कामना तस्याः पूरकः ।

२९७. कान्तः —सर्वातिशायि सौन्दर्यादि गुणैः सतत सेवितत्वेन कान्तः कमनीयः

२९८. कामः—मुमुक्षुभिः कामितः, अपुनर्भवायेति ।

२९९. कामप्रदः—भक्त कामनाभ्योऽपि यः अधिकं ददाति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

३००. प्रभुः— प्रभवतीति प्रभुः। सर्वेषां चित्तहरणे तस्यैव प्राभवम्।

३०१. ॐ युगादिकृत—प्रलयान्ते संसृतिसिसृक्षया यः संवत्सरायनमासादि-भेदेन यः युगारम्भं विधते।

३०२. युगावर्त्तः युगान् आवर्त्तयति पौनः पुण्येन यः सः युगावर्त्तं।

३०३. नैकमायः—अनन्ताश्चर्यमुक्त.।

३०४. महाशनः--अनन्त कोटि ब्रह्माण्डानां सम्वर्त्तकालेनिगरणात्।

३०५. अदृश्य वुद्धीन्द्रियैः यः द्रष्टुमशक्यः

३०६. व्यक्तरूपः —व्यक्तं प्रकटं चराचरात्मकं स्वरूपं यस्येति सः।

३०७. सहस्रजित् —यः शयानः एव सहस्र युगसंख्याकं जयति सः।

३०८. अनन्तजितः —भगवदीय महिम्नः निरवधित्वेन अनन्तान् जयतीति।

३०९. इष्टः—परमानन्द रूपत्वाद्यः सर्वैः कामितः।

३१०. अविशिष्टः —प्राणिनामन्तर्हृदये सर्वान्तर्यामित्वेन निष्पक्षत्वेन यः व्यवस्थितः।

३११. शिष्टेष्टः —शिष्टै रपि उत्कृष्ट पुरुषार्थत्वेन इष्ट. स शिष्टेष्टः।

३१२. शिखण्डी-अप्रधृष्यंतेजः शिखण्डं. तदस्यास्तीति, मयूरपक्षनिर्मितमुकुटधारकः

३१३. नहुषः—यः जीवान् स्वमायानाय पतितान् तत्रैव नह्यतीति सः।

३१४. वृषः—धर्मरूपी भूत्वा यः भक्तमनोरथ पूरकः।

३१५. क्रोधहाः—कश्यप प्रार्थनया यः क्षत्रहानिदं क्रोधं हतवान् सः।

३१६. क्रोधकृत् —परशुरामावतार रूपेण यः क्षत्रियेभ्यः क्रोधंकृतवान्।

३१७. कर्त्ताः— सर्वंजगत् करोतीति।

३१८. विश्ववाहुः—यस्यबाहवः सर्वाधार रूपाः, जगदुद्धरण शीलाश्च।

३१९. महीधरः—भारावतरणं विधाय यः महींधत्ते समहीधरः।

३२०. अच्युतः—न कुत्रापिच्युतः, षड्भावविकारान्तर्गता अन्ये देवाः, तेष्वयमेव-

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

स्वस्थानाच्यवनाद्धेतो अच्युते त्यभिधीयते ।

३२१. प्रथितः अच्युतत्वेनैव यः लोके प्रसिद्धः सः प्रथितः ।

३२२. प्राणः—प्राणिति सर्वानिति, जन्तूनां जीवित रूपत्वात् प्राणः ।

३२३. प्राणदः—सुराणां प्राणदातृत्वात्प्राणदः परिकीर्त्तितः ।

३२४. वासवानुजाः—इन्द्रावरजत्वात् वासवानुजः ।

३२५. अपांनिधिः—देवासुरै सागरेमथ्यमाने महार्णवविधारणात्तदयं अपांनिधिः

३२६. अधिष्ठानः—सर्वभुतावासतया सर्वकारणरूपं ब्रह्म अधिष्ठानमित्युच्यते

३२७. अप्रमत्तः—प्राठिभ्य स्वस्वकर्मानुकूल फलप्रदानविषये सदा वहितस्वभावः

३२८. प्रतिष्ठित—यः सर्वदास्वे महिम्नि नित्यत्वेनावस्थित सः

३२९ स्कन्दः—स्कन्दयति शोषयति दानवानिति स्कन्दः । स्कन्दिर् गतिशोषणयोः

३३०. स्कन्दधरः—स्कन्दं-षडाननधृतवान्, धर्मसरणि सन्धारकत्वाच्चेति ।

३३१. धुर्य—धुरंवहतीति जगत-जन्म स्थित्यप्ययादिभारं य. धृतवान् सः ।

३३२. वरदः—भक्तेभ्योऽभीष्टदातृत्वात् वरदः ।

३३३. वायुवाहनः—वसन्तिभूतान्यस्मिन्निति, वासयतिवेत्ति वासुः, दीव्यतीति देव वासुभाऔ देवश्चेतिवासुदेव परब्रह्म पदाभिधेयः ।

३३४. वृहद्भानुः—वृहन्तः भानवोयस्येति सः ।

३३५. आदिदेव—पादात्मक विभूतिभिः यः कारणरूपत्वेन क्रीडति सः ।

३३६. पुरन्दरः—देवद्रुहां पुराणि दारयति इति पुरन्दरः ।

३३७. अशोक—भक्ताना शोकमोहविनाशकत्वात् षडूर्मिरहितत्वाच्च, क्षुत्-पिपासा जन्म मृत्यु शोकमोहौ षडूर्मयः ।

३३८. तारणः—सांसारिक त्रिविधताप भीतिभ्यः यः तारयति सः ।

३३९. तारः—तारयति जन्म, जरा, निधनादि भीतिभ्यः ।

३४०. शूरः—शृणात्यमित्रानिति, सर्वजैत्रत्वादिति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

३४१. शौरिः—शूररस्यापत्यमित्यर्थे शूरशब्दाददन्ताद् अतरञ्, वृद्धिः ।

३४२. जनेश्वरः—जनानां-जायन्ते इति जनाः जन्तवः तेषाम्ईश्वरः ।

३४३. अनुकूलः—यः नित्यं भक्तैकप्रवणः ।

३४४. शतावर्त्तः-य सर्वत्र वर्त्तमानः अनन्तासु नाडिषु योनिनुवा सर्वदा स्थितः ।

३४५. पद्मी: —लीलापद्मधरत्वात् ।

३४६. पद्मनिभेक्षणः—पद्मंनिभे प्रोज्वले ईक्षणे नेत्रे यस्य सः ।

३४७. पद्मनाभः—पद्मनाभौ यस्य, पद्मवत् विभूत्यञ्चिता नाभिर्यस्येति ।

३४८. अरविन्दाक्षः -रक्तारविन्द नयनत्वादरविन्दाक्षः

३४९. पद्मगर्भः योहृत्पुण्डरीकस्थत्वात् पद्मगर्भः स्मृतो बुधैः ।

३५०. शरीरभृतः—स्वय अनामरूपो भूत्वा प्राणिनां शरीराणि बिभर्त्तिसः ।

३५१ महर्द्धिः—निर्मर्यादविभूतित्वात् ।

३५२. ऋद्धः—अनन्त विभूतिजैश्वर्यसम्पन्न. अखिलप्रपञ्च जनकत्वादिति ।

३५३. वृद्धात्मा-वृद्ध —पुरातनः आत्मा यस्येति सः ।

३५४. महाक्षः-अक्षः-गरुड़ः, लोचनानि चेति, महान् बृहत्कायः गरुड़ः वाहनयस्य

३५५. गरुडध्वजः—वाहनत्वादेव ध्वजे गरुडो यस्येति सः ।

३५६. अतुलः—तुला-सादृश्यं तद्रहितः । प्राकाम्यैशित्ववशित्वादिभिः अनुपमः

३५७. शरभ.—शरेषु शीर्यमाणेषु प्राणिशरीरेषु अन्तरात्मत्वेन यःभाति ।

३५८. भीमः—अग्निवाय्वर्कादय यस्माद्बिभ्यति सः । भयादस्याग्निस्तपति भयात्तपति सूर्य. । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ।

३५९. समयज्ञः—यः सर्वेषां अधिकारान् विदन्, उचितानुचित फलविश्राणन समय सम्यकु विजानाति सः, यद्वा यज्ञेषु सम-मालक्ष्मी स्तया सहितः ।

३६०. हविर्हरिः—हूयतेवह्नौ स्वाहाकारत्वेति हविः आज्यादिकं, तं हरति सर्वदेवमयत्वात् ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

३६१. सर्वलक्षणलक्षण्यः –सर्वैः लक्षणैः- प्रमाणैः यः लक्षणीयः वेद्यश्च ।

३६२. लक्ष्मीवान्ः—अनन्त श्रीनीराजितपदपयोजवत्वाद्यः लक्ष्म्या नित्ययुक्तः ।

३६३. सामितिञ्जयः—समिति-देवासुर संग्रामं यः यजतीति सः ।

३६४. विक्षरः—विगत दूरीभूतः क्षरो विनाशोयस्येति विनाश रहितः ।

३६५. रोहितः—मत्स्यरूपधारी, पद्मगर्भाभत्वेनापि ।

३६६. मार्गः—परमानन्दावाप्त्यै मार्गरूपेण यः सर्वैः मृग्यते स मार्गः ।

३६७. हेतुः—सर्वाभीप्सितानामर्थानां प्राप्त्यर्थं एकमात्र कारणरूपः ।

३६८. दामोदरः—दाम-रज्जुः उदरे यस्य, यशोदादाम बन्धनात् दामोदरः ।

३६ . सहः—यशोदाकृत बन्धादिमहत्वात् सहः इत्यन्वर्थकं नाम ।

३७०. महीधरः—भूभारनाशनेन ज्या धारणात् महीधरः ।

३७१. महाभागः—अन्यानतिक्रमणीय भाग्यवान् । महद्भिरपि भजनीयः ।

३७२. वेगवान्ः—मनसोप्यधिक जववान् ।

३७३. अमिताशनः–गोपैरिन्द्राय कल्पितं पर्वताकारं भोजन निचयं यः भुक्तवान्

३७४. उद्भवः –भवविभवोत्पत्युपादान कारणम् । उद्गतः भवोयस्मादिति ।

३७५. क्षोभणः—प्रकृतौ पुरुषे च प्रविश्ययक्षोभकर्त्ता, यश्चरचयमविनाशीति ।

३७६ देवः जन्तून् भयपाशेन वद्ध्वायस्तैः सहदीव्यति ।

३७७. श्रीगर्भः—परमैश्वर्य युक्तत्वात्, जगद्रूपा श्रीः यस्य गर्भे सः ।

३७८. परमेश्वरः—परमः सर्वोत्कृष्टश्चासावीश्वरः सर्वेषामपि गुरुः शास्ता ।

३७९. करणंः--जगदुत्पत्तौ यः साधकतमः सर्वोत्कृष्टत्वात् ।

३८०. कारणंः—यः सर्वान् हेतून् कारयति स्वतन्त्ररूपः, निमित्तोपादान रूपः ।

३८१. कर्त्ताः—अन्यानपेक्षः ।

३८२. विकर्ताः—विचित्र भुवनाभोगानां कर्त्ता ।

३८३ गहनः –अन्यानभिज्ञेय स्वरूप चेष्टा सामर्थ्यादिभूषितः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

३८४. गुहः—स्वीय मायाजवनिकया यः स्वयंलीलयैव समाच्छन्नो भवति ।

३८५. व्यवसायः—यस्माग्नित्यं ज्योतिश्चकं ध्रुवेसीयते-वध्यते सः व्यवसायः ।

३८६. व्यवस्थान.—व्यवतिष्ठति सर्वाधारतया भुवन मण्डलमस्मिन्निति सः ।

३८७. संस्थानः—प्रलयकाले सन्तिष्ठन्ति भूतान्यस्तस्मिन्निति ।

३८८. स्थानदः—ध्रुवादि भक्तेभ्यः यथोचित स्थान दातृत्वात् ।

३८९. ध्रुवः—सच्चिन्मात्रत्वेन अविनाशी ।

३९०. परर्द्धि—पराउत्कृष्ट । ऋद्धिः ऐश्वर्यंयस्य, सर्वश्रेष्ठ विभूतिमानिति ।

३९१. परमः—सर्वोत्कृष्टः, स्पष्टः साक्षित्व शून्यः ।

३९२. तुष्टः—सदा परमानन्दरूपः ।

३९३. पुष्टः—सदैकरूपः ।

३९४. शुभेक्षणः—शुभं शीतलं सौशील्यैश्वर्ययुक्तं ईक्षणं लोचनं यस्य सः ।

३९५. रामः—रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि । इति रामपदे नासौ परं ब्रह्माभिधीयते इति रामः । पशुविशेषे स्या ज्जामदग्न्ये हलायुधे । राधेव, चासिते चैव परब्रह्मणि वाच्यवत् ।

३९६. विरामः—विरमणं विरामः, उत्पत्ति स्थित्यवसान कारकः ।

३९७. विरजः—सत्वस्वरूपः, अस्पृष्टरजस्तमस्कः ।

३९८. मार्ग.—मृग्यते अपुनरावर्त्तनार्थिभिरिति । मृज्यत इति मार्गः पन्थाः, यमनुसृत्य दुःखत्रयाभिघाताद्विमुक्ता भवन्ति ।

३९९. नेय—नेतुंयोग्यः, दुर्लभं मानुषं विग्रहमवाप्य स एव नेयः प्राप्तव्यः ।

४००. उच्चतञ्च.—किमेकान्ते ध्येयं ? चरणयुगलं कौस्तुभभृतः ।

४०१. नयः—नयतीति, प्रापयति परं पदमिति ।

४०२. अनयः—नयस्वरूपः पातकिभिरप्राप्यः ।

४०३. वीरः—वीरयति स्वपराक्रम महिम्ना पराभवति असुरानिति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

४०४. शक्तिमतांश्रेष्टः—शक्तिः पराक्रमः अस्त्येषामिति ते शक्तिमन्तः- तेषां तेषु वा अनन्य गुणगरिमा ञ्चितत्वेन श्रेष्ठः प्रशस्यः।

४०५. धर्मः—अभ्युदय नि.श्रेयसाभ्यां सर्वस्य धारणात् धर्मः।

४०६. धर्मविदुत्तमः—धर्मं विदन्ति ये ते धर्मविदः तेषूत्तमः सर्वोपजीव्य प्रभाव वत्वादिति।

४०७. वैकुण्ठः—विकुण्ठाया अपत्यमिति, कुठिप्रतिघाते, इतिघातः प्रत्याक्रमणं कुण्ठः, विगता, विरुद्धा वा कुण्ठा येषां, तेभ्यः विविध गति दातृत्वात्, अथवा-विकुण्ठानामक नगर्याः कारकः।

४०८. पुरुष—पुरिनवद्वारे चिन्मयत्वेन शेते इति पुरुषः।

४०९. प्राणः— सर्वेषां प्राणनाद्, प्राणदानाच्च प्राणदः।

४१०. प्रणवः—प्रणूयते प्रकर्षेण स्तूयते निगमागम कदम्बकैरिति-प्रणवः प्रणव सर्ववेदेषु, ॐकार रूप, कालत्रयेप्यसस्पृष्ट रजस्तमकः। अतएव तस्य वाचक प्रण :, इति योगसूत्रेणाप्युदाहृतम्।

४११. पृथु प्रपञ्चरूपेण यशोविस्तारवत्वात पृथुः।

४१२. हिरण्यगर्भः—हिरण्यरूपं ब्रह्माण्डबीजे गर्भेयस्य सः।

४१३. शत्रुघ्नः देवशत्रूनसुरान् हन्ति इति, उन्मार्ग नेतारं इन्द्रियवर्गं, यः हन्ति सन्मार्गमनुनयति सः।

४१४. व्याप्तः—विशेषेण सर्वकारणत्वेन सर्वत्र व्यापनाद् व्याप्त।

४१५. वायुः वाति-गच्छति सर्वत्र, वा गतिगन्धनयोः।

४१६. अधोक्षज.—अधः कृतं अक्षजं-ऐन्द्रियकं ज्ञानं येनरूएष पूर्वेषामपि गुरुः कालेनानवच्छेदादिति।

४१७. ऋतुः ऋच्छतीति ऋतुः, कालात्मरूपः।

४१८. सुदर्शनः—शोभनं दर्शनं यस्य, यद्वा शोभनं दर्शनं ज्ञानं यस्य।

४१९. कालः—सर्वेषां चिदचिद्रूपाणां कलनात्-संख्यानात् कालः।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

४२०. परमेष्ठी:—परमे-सर्वोत्कृष्टे वैकुण्ठरूपे स्थाने तिष्ठतीति सः।

४२१. परिग्रह —ऐहिकामुष्मिक फलदत्वेन भक्तैर्यः परितोगृह्यते।

४२२. उग्रः अधर्मभरिते जगति योऽवतीर्य अधर्मं प्रोग्नायकान् हतवान् उग्ररूपेण स उग्र।

४२३. संवत्सरः-- संवसन्ति भूतानि सुखेन यन्निमितकालचक्रे।

४२४. दक्षः—जगद्रूपेण वर्द्धमाणः, यः सर्वभूतानां समुद्भूवः।

४२५. विश्रामः—अविद्यादिभिः क्लेशैः, मदादिभिरुपक्लेशैः अत्यन्त तप्तानां मुमुक्षूणां अनन्तविश्रामसुख दायकः।

४२६. विश्वदक्षिणः—अपकारिष्वपि क्षमावत्वाद् विश्वदक्षिणः।

४२७. विस्तारः -यदाधारतया जगद् विस्तृता, यद्वा यः वेदभर्यादा विस्तार्य स्थितः। विस्तारणाद्वा।

४२८. स्थाणुस्थावरः-तिष्ठतीति स्थावरः, स्थेशभासपिसकसो वरच्, तिष्ठतीति स्थाणुः, येनकेनाप्यचाल्यः, यस्मिन् पृथ्वादय स्थिता.।

४२९. प्रमाणः—ज्ञानात्म द्वारा सर्वप्रमाण प्रत्ययात्मकः।

४३०. वीजम्:--कल्क्यन्ते भक्तरक्षार्थं यः पौनः पुन्येन धर्मप्ररोहणं करोतिसः।

४३१. अव्ययम्:—व्येतिनश्यति कालानुरूपप्रत्वेनेति व्ययः न व्ययः। नास्ति व्ययः विनाशो यस्येति सः अव्ययः।

४३२. अर्थः— अर्थ्यते-प्रार्थ्यते सुखरूपेण सर्वैरित्यर्थः।

४३३. अनर्थः —मन्दभाग्यैरर्थिभिः निर्व्याजं यः नार्थ्यते सः अनर्थः।

४३४. महाकोशः— अन्नमयादिपञ्चकोशाः पद्मादि महानिधयश्च। कोशाः भाण्डगृहा यस्य सः महाकोशः।

४३५. महाभोगः—महान्तः सुखरूपा भोगा यस्य सः।

४३६. महाधन -महान्-अनिरूप्यं असंख्येयं धनं यस्यारस्तीति।

४३७. अनिर्विण्णः—निर्विण्णः प्रमादी, तद्भिन्नः, सर्वजगद् व्यापार सञ्चालने

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

यः सततं जागरूक स्वभावः ।

४३८. स्थविष्ठः— अतिशयेनः स्थूलः, विराट्रूपत्वेन सर्वस्थौल्यात् ।

४४९. अभूः—भवतीति भूः, न भवतीत्यभूः जन्ममरणादि रहितः ।

४४०. धर्मयूपः—धर्मस्य यज्ञस्तम्भ स्वरूपः ।

४४१. महामखः —यस्मिन् कृताकृतानां समर्पणेन यज्ञस्थ समृद्धं रूपं भवति ।

४४२ नक्षत्रनेमिः—नक्षत्रात्मकं अनामयं ज्योतीरूपं यच्चक्रं तं नित्यं यः भ्रामयति, अनुयातिच, सः ।

४४३. नक्षत्रीः—शिशुमारात्मकं ज्योतिश्चक्रं नक्षत्र मित्युच्यते । तदस्यास्तीति सः नक्षत्री ।

४४४. क्षमः—सर्वेतिकर्त्तता सञ्चालन पटीयान् ।

४४५. क्षाम.—ऐन्द्रियक सर्वसन्निकर्षजन्य विकाराणां नाशे सति य. स्वात्मतया व्यवस्थितः ।

४४६. समीहनः—यः सर्वान् स्वाधिकारे निवेशयति सः ।

४४७. यज्ञः—सर्वदेवतृप्तिकारणत्वेन यः यज्ञस्वरूपः ।

४४८. इज्य — सर्वपूज्य , सर्वेष्टदेवरूपः ।

४५९. महेज्यः—महांश्चासौ इज्यश्चेति सर्वाञ्चितत्वेन महेज्यः ।

४५०. क्रतुः—अग्निष्टोमादि समस्त यज्ञानां फलदः, कारकश्चेति ।

४५१. सत्रः—सतांत्राता ।

४५२. सतांगतिः—सत्कर्म प्रवणानां भक्तानां परमगतिदायकः ।

४५३. सर्वदर्शी —यःसर्वेषां जन्तूनां पुण्यपाप द्रष्टा ।

४५४. विमुक्तात्माः—विशेषेण सर्वबन्ध विनिर्मुक्त आत्मायस्य ।

४५५. सर्वज्ञः सर्वं भवीयं भवाभवं विजानाति सः ।

४५६. ज्ञानमुत्तमम्—जन्म रहितत्वेन सर्वज्ञानरूपः श्रेष्ठः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

४५७. सुव्रतः— भक्तानां रक्षार्थंय व्रतवान्, अतः वसु- शोभनं व्रतं यस्येति सः

४५८. सुमुखः—ध्यातृणां विषये यस्य मुखं सुप्रसन्नं मनोहरं, चास्तीति ।

४५९. सुक्ष्मः—निगूढाभिप्रायत्वात्, इन्द्रियाणामविषयत्वात् सूक्ष्मः ।

४६०. सुघोषः—यस्यप्राप्त्यै शोभनः वेदस्वाध्याय घोषः शक्यते सः ।

४६१. सुखदः—भक्तेभ्यः सुखं ददातीति, अभक्तानां सुखंद्यति नाशयति ।

४६२. सुहृत्ः—शोभनं-भक्तेभ्यः सदा परमाभीष्टदं हृदयं यस्य सः ।

४६३. मनोहरः -निसर्ग सौहार्दात् भक्तानां हृदयहारकत्वात् ।

४६४. जितक्रोधः—जितः क्रोधोयेन, सदासत्वसत्ताञ्चितत्वात् ।

४६५. वीरवाहुः वीरा-विक्रान्ता शत्रुनिर्दलन प्रवणा वाहवो यस्या ।

४६६. विदारणः—विदारयति दिव्यायुधैः दानवानिति सः ।

४६७. स्वापनः—अज्ञानिनः मायानाये प्रक्षिप्ययः आत्मबोधाद्दूरी करोति ।

४६८. स्ववशः—सृष्टि स्थित्युत्पत्ति प्रलयादिकं यस्य स्वायत्तम् ।

४६९. व्यापी महाकाशवत् सर्वव्यापकः, सर्वाप्यायन निदानञ्च ।

४७०. नैकात्माः—स्थित्युत्पत्त्यादिषु बहुरूप धारकत्वात् ।

४७१. नैककर्मकृत्—सांसारिकानेक कर्मणां कर्त्ता ।

४७२. वत्सरः—धर्मात्मत्वेन यः सर्वेषां अन्तर्वसति सः ।

४७३. वत्सलः—वत्सेषु भक्तेषु अनुग्रहीता अभिलाषा यस्य ।

४७४. वत्सीः—वत्सानां-भक्तानां पालकः । जगत् जनकत्वात् ।

४७५. रत्नगर्भः—रमयन्तीतिरत्नानि, तानिगर्भेयस्य सः समुद्रः सोपिगर्भे यस्य, सर्वसन्धारकत्वादिति ।

४७६. धनेश्वरः—सर्वसम्पत्समृद्धीनां ईश्वरत्वात् धनेश्वरः ।

४७७. धर्मगुप्ः—धर्मं गोपायति, तद्रक्षार्थं च योऽवतीर्णो भवति ।

४७८ धर्मकृत्— धर्मरक्षण पूर्वकं वेदमर्यादा स्थापनं करोतीति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

४७९. धर्मी:—धर्माणां सन्धारकः।

४८०. सदसत्:—यः सत्तया सद्रूप, जगद्रूपेण च असद्रूपः।

४८१. क्षरः—यः जगद्रूपेण क्षरति नाशमश्नुते।

४८२. अक्षरः—यः नित्यशुद्ध बुद्ध रूपेण कूटस्थः।

४८३. अविज्ञाता:—शरणापन्नानां किञ्चिदप्यविचारणात्।

४८४. सहस्रांशु:—अनन्तवाची सहस्रशब्दः, अनन्ता अंशवो किरणाः जीवरूपाः यस्येति सः सहस्रांशुः।

४८५. विधाता —विदधाति चराचरात्मकं ब्रह्मांण्ड पिण्डमितिसः।

४८६. कृतलक्षणः— सदाचैतन्यरूपः।

४८७. गभस्तिनेमिः—सौराः किरणाः गभस्तयः तेषां नेमिश्चक्रम्।

४८८. सत्वस्थः—सत्वे सर्वजीवान्तः करणे तिष्ठतीति।

४८९. सिंहः—सिंहादप्यधिकं पराक्रान्तः नृसिंहः।

४९०. भूतमहेश्वरः--भवन्तीतिभूताः प्राणिन स्तेषां महेश्वरः।

४९१. आदिदेवः—सर्वभूतानां आदिभूतः, स्वयमनादिश्च।

४९२. महादेवः— महोश्चासौदेवः दानादि गुणयुक्तः।

४९३. देवेश.—देवानांईशः निग्रहानुग्रह समर्थः।

४९४. देवभृत्: –देवान् बिभर्त्ति पालन पोषणादिनेति।

४९५. गुरुः सदुपदेष्टत्वात्, अज्ञाननाशत्वात् गुरुः।

४९६. उत्तरः—संसारा कूपार सन्तारकः।

४९७. गोपति —गोपानां पतिः, गवां सूक्तदुरुक्त रूपवाचां पति।

४९८. गोप्ताः—गोपनात्-जगद्रक्षणात् गोत्रप्तेति।

४९९. ज्ञानगम्यः—केवलंज्ञान पाथेदेव यः प्राणः।

५००. पुरातनः— यस्त्रिकाले णेकरूपः।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५०१. शरीरभूतभृतः—यः प्राणरूपो भूत्वा पञ्चभूतानां धारकः ।

५०२. भोक्ताः—अनन्त रूपतया जगद्भोग कारकः ।

५०३. कपीन्द्रः—कपि. वराहः, श्रेष्ठश्च, कपीनां कीशानां इन्द्रः रामः । रामावतारे कपिरूपमापन्नानां वानराणां इन्द्रः स्वामी ।

५०४. भूरिदक्षिणः—भूरीणां यज्ञरूपाणां धर्माणां दक्षिणः- वर्धकः ।

५०५. सोमपः—हयमेधादि यज्ञेषु यः सोमं पिवति सः ।

५०६. अमृतपः—सागरान्निः सृतं अमृतं पाति राक्षसेभ्यः, यः स्वयं पिबति च ।

५०७. सोमः—चन्द्ररूपेण औषधीनां परिपोषकः ।

५०८. पुरुजित्ः पुरु -विराट्रूपं जयति इति पुरुजित् ।

५०९. पुरुसत्तमः—पुरौ-विश्वरूपे सत्तमः अतिश्रेष्ठः ।

५१०. विनयः—विनयति विनम्रीकरोति दण्डदानेन दुष्टानिति ।

५११. जयः—जयति दुरासदानपीति जयः ।

५१२. सत्यसन्धः—सत्या-अनिवर्त्तिनी सन्धा-प्रतिज्ञा यस्येति ।

५१३. दाशार्हः—दाश्यते दीयते इति दाशः दानं तमर्हतीति पयसामर्णवइव वचसां परमात्मन्येव पर्यवसान मितितदर्हत्वम् ।

५१४. सात्वतांपतिः सात्वतां भक्तानां पति -पालकः रक्षकश्च ।

५१५. जीवः—क्षेत्रज्ञत्वेन यः क्षेत्रं चेतनया युनक्ति ।

५१६. विनयिता — यः सर्वान् स्वस्वाधिकारे विनयति ।

५१७ साक्षीः— साक्षाद्रूपेण यः सर्वेषां द्रष्टा ।

५१८. मुकुन्दः—मुक्-मोक्षं अपुनरावर्त्तनरूपं सुखं भक्तेभ्यः ददातीति ।

५१९. अमितविक्रमः —अमितः अनुपमः अतुलितः विक्रमः शक्तिर्यस्य ।

५२०. अम्भोनिधिः—आधारशक्ति कमठ स्वरूपेण सागराम्भसि येन स्वात्मा निधीयते सः अम्भोनिधिः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५२१. अनन्तात्मा:— देशकालादिभिरपरिमेयस्वभाव: ।

५२२. महोदधिशय:—प्रलयकाले जगज्जम्बाल जालं संहृत्य य: महोदधौ क्षीरसागरे शेते ।

५२३. अन्तक:- अखिलानां विभूतीनां प्रलये अन्तकारक: ।

५२४. अज:—न जायते इत्यज:, केवलं धर्मविनाय य: अवतीर्णो भवति ।

५२५. महार्ह:—महोश्चासौअर्हश्चेति, महं-पूजां अर्हतीति । यं सर्वे पूजयन्ति ।

५२६. स्वाभाव्य:—स्वभूतैराभि मुख्येन भावनीयत्वात्स्वाभाव्य: ।

५२७. जितामित्र:-विज्ञान विरोधिन: अमित्रा: मायामोहादय: येन जिता: ।

५२८. प्रमोदन:—प्रमोदयति इष्ट फलदानेन भक्तानिति स ।

५२९. आनन्द:—अपाङ्मनसगोचर रूप: आनन्द यस्यास्तीति ।

५३०. नन्दन:--नित्यं अभीष्ट दानेन भक्तानां समृद्धि कृत् ।

५३१. नन्द —य: महत: महीयान्, आनन्दस्वरूप: ।

५३२. सत्यधर्मा:—सत्यज्ञान धर्मादि विभूति । नीराजित पादपीठ: ।

५३३- त्रिविक्रम:— स्वमहिम्ना य: त्रीन् लोकान् विक्रमते स: ।

५३४. महर्षि:—महांश्चासौ ऋषि: द्रष्टा, ऋषिर्दर्शनात् ।

५३५. कपिलाचार्य:— सिद्धानां कपिलोमुनि: ।

५३६. कृतज्ञ:—कृतं जगद् व्यवहारं जानातीति कारुण्य पूर्णत्वात् कृतज्ञ: ।

५३७. मेदिनीपति: —मधुकैटभमेद: प्रभवाया: मेदिन्या: पति: पालक: ।

५३८. त्रिपद:—प्रणवे त्रीणि वाचकानि पदानि यस्य स: ।

५३९. त्रिदशाध्यक्ष:—तिस्र: दशा अवस्था येषां ते त्रिदश: देवा: तेषामध्यक्ष: ।

५४०. महाशृंग: —प्रलयकालेसर्व धिजुष्टां नावं स्वशृंगे वध्वा यश्चचार ।

५४१. कृतान्तकृत् —कृतस्य जगत: अन्तं करोतीति, यद्वा-कृतान्तमषिय: करोति

५४२. महावराह: रसातल गतामुर्वीं वराहरूपेणोद्धृत्य य: क्षणादुत्थित: ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५४३. गोविन्दः गोभिः वेदवाक्यैर्यः विन्दः-प्राप्त्यर्हः सः।

५४४. सुषेणः — सुन्दरा त्रिगुणात्मिका जगद्रूपाख्येना यस्य सः।

५४५. कनकांगदीः—कनकमयं अंगदं भुजभूषणं यः धत्ते सः।

५४६. गुह्यः—उपनिषत्प्रतिपाद्य स्वरूपत्वात्, प्राकृतैरगम्यः।

५४७. गभीरः—अगाधगाम्भीर्य वत्वात् गभीरः।

५४८. गहनः— यः सर्वत्र प्रविशति, यस्मिन् प्रवेष्टुं न शक्यते इति।

५४९. गुप्तः—अततदर्शैः दुखदोधत्वात् ।

५५०. चक्रगदाधरः—चक्रं गदां च धरतीति सः।

५५१. वेधाः—विदधाति ब्रह्माण्ठव्यूहमिति ।

५५२. स्वांगः - स्वयमेव कार्यकारणतामेत्य स्वस्मादेवयः जगद्रचर्यात।

५५३. अजितः - यः केनाप्यजितः, सर्वांश्चयः जयति।

५५४. कृष्णः - कृषिर्भूवाचकः शब्दःणश्च निर्वृति वाचकः।
तयोरैक्यं परं ब्रह्मकृष्ण इत्यभिधीयते ॥

५५५. दृढः—स्वरूपस्थौल्येनः अमेयबलनिवहाञ्चितो यः सः दृढः।

५५६. दृढ.- -स्थूलवलयोरिति पाणिनीयानुशासनम्।

५५७. संकर्षणोऽच्युतः—यः स्वयमच्युतत्वेन प्रलयकाले सर्वसंहार पुरःसरं योगनिद्रामधिशेते।

५५८. वरुणः—यः सर्वमावृत्य स्थितः सः (वृञ् उनन्) वरुणः।

५५९. वारुणः—वरुणस्यापत्यं वसिष्ठागस्त्य स्वरूपत्वात्।

५६०. वृक्षः—सर्वोपजीव्यत्वादु, सर्वेषामाश्रयत्वात्।

५६१. पुष्कराक्षः—पुष्कर वदाह्लादकत्वेन यस्याक्षिणी प्रसाद वर्षणेन भक्तानां पोषके इति सः।

५६२. महामनाः— स्थित्युत्पत्त्यव्ययादिषु यः स्वायतः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५६३. भगवान्:—अनन्तक ल्याणै गुणवत्तया यः पूज्यतमः ।

५६४. भगहाः—कल्पान्ते सर्वेश्वर्यं संहारकः ।

५६५. आनन्दीः—सुखसम्पत्ति दानेन भक्तानामानन्ददायक ।

५६६. वनमालीः—स्वसृज्यभूत सूक्ष्माणां वैजयन्तीं नाममालां धारयति यः स वनमालीत्युच्यते ।

५६७. हलायुधः—हल-सोरं सर्वदा आयुधरूपेण यः धत्ते ।

५६८. आदित्यः—यः अदित्यां कश्यपादद्भुत । आदत्ते सर्वमिति वा ।

५६९. ज्योतिरादित्यः—समस्त तेजोहरण रूप स्वज्योतिषा यः दीप्यते ।

५७०. सहिष्णुः— सुखादि द्वन्द्व सहन कारित्वात्सहिष्णुः ।

५७१. गतिसत्तमः—ज्ञानगमन प्राप्तिविधिषु सत्तमः-श्रेष्ठः ।

५७२. सुधन्वाः— शोभन इन्द्रियात्मकं धनुर्यस्येति ।

५७३. खण्डपरशुः—परशुराम रूपेणरिपूणां खण्डकारकः परशुर्यस्य ।

५७४. दारुण— वाह्याभ्यन्र शत्रूणां कामादीनां नाशकत्वात् ।

५७५. द्रविणप्रदः— भक्तेभ्यः वाञ्छित फल दातृत्वात् ।

५७६. दिविस्पृकः—एकस्थत्वेनैव यः दिवमपि स्पृणतीति सः ।

५७७. सर्वहकः—यः सर्वान् पश्यति, सर्वदर्शनात् सर्वज्ञः ।
व्यास, व्यस्यति- विभजति वेदानिति, वेदविभाग कारकः ।

५७८. वाचस्पतिः—वाचः भारत्याः पतिः ।

५७९. अयोनिज — मातृयोनिं हात्वा स्वेच्छया जन्म धारकत्वात् ।

५८०. त्रिसामा—त्रिसामेति वेदव्रतवाचकः । त्रप्युक्त मन्त्रै यः स्तुलो भवति ।

५८१. सामगः— स्यति-दुःखयति दुरध्येयत्वादिति, सातिभ्या मनिन् ।
सामगायति इति सामगः ।

५८२. साम— कालुष्य नाशकत्वात् ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५८३. निर्वाणम् — अपहतसमस्तैषणानां संसारबन्ध मोचकः।

५८४. भेषजः—संसार रूपामयान्मुक्त्यर्थं परमौषधरूपः ।

५८५. भिषक् --भिषज्यतीति भवातंङ्कात् मोचकः।

५८६. संन्यासकृतः असंन्यस्त संकल्पेभ्यः ब्रह्मविद्योपदेशेन सर्वन्यासरूप संन्यासस्य कारकः ।

५८७. शमः— ज्ञानसाधनतया व्यवस्थितः ।

५८८. शान्तः— य सदा सर्वत्र अविकृतमानस स ।

५८९. निष्ठाः—कल्यान्ते सर्वाविभूतयः निश्चलतया यत्र तिष्ठन्तीति ।

५९०. शान्तिः-- परमोपरतिः । न यत्रशोको न जरा न मृत्युः ।

५९१. परायणः- भक्तानां सर्वोत्कृष्टा धिष्ठान रूपः ।

५९२. शुभाङ्गः—अखण्डानन्तसौभगगर्भिताङ्गत्वात् शुभाङ्गः ।

५९३. शान्तिदः—रागद्वेषादि नाशकत्वेन परमोपरतिदायकः ।

५९४. स्रष्टाः—कर्म वैचित्र्यत सृष्टीनां सृष्टा निर्माता ।

५९५. कुमुदः—कौ पृथिव्यां, आनन्दमयत्वेन यः मोदते ।

५९६. कुवलेशय —कुत्सित बलं येषां ते कुवलाः जीवाः यः तान नियच्छन् याति सः । अथवा कुवले सर्पोदरे यः शेते स. कुवलेशयः ।

५९७. गोहितः गवां हितार्थं गोवर्धन रूप धारकः ।

५९८. गोपतिः—गोः स्वर्गस्य पतिः, गवां-वाचां वा पतिः ।

५९९. गोप्ताः—यः भवीय जन्तूनां कर्मफल चक्रस्य रक्षकः ।

६००. वृषभाक्ष —भक्ताभीष्ट फलप्रदत्वात् यस्याक्षः वृषभः वर्षुकजलदः ।

६०१. वृषप्रियः— वृषोहि भगवान् धर्मः प्रियोयस्येति ।

६०२. अनिवर्त्तीः—देवासुर संग्रामात् यः न निवर्त्तते इति ।

६०३. निवृत्तात्माः— पापपुञ्जेभ्यः निवृत्तः आत्मायस्य ईदृशः दुष्कर्म

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

फलमोचकः सः ।

६०४. संक्षेप्ताः—प्रलये विस्तारस्य संहारकः ।

६०५. क्षेमकृत्—शरणं प्रपन्नानां क्षेमं-कल्याणं करोतीति सः ।

६०६. शिवः—स्मरणमात्रेणैव पापोन्मूलन कारकः ।

६०७. श्रीवत्सवक्षाः—लक्ष्मी वाल्लभ्य सौभाग्य चिह्न श्रीवत्सनामकं वक्षसि यस्यास्तीति सः ।

६०८. श्रीवासः—श्रियः विहारस्थानत्वात् श्रीवासः ।

६०९. श्रीपतिः—श्रियः पतिः, समुद्रमथन समये लक्ष्म्या वृतत्वादिति ।

६१०. श्रीमतोवरः—सर्वदेवोत्तमोत्तमः ।

६११. श्रीदः—समुपासकेभ्यः श्रीदातृत्वात् ।

६१२. श्रीशः—लक्ष्मीकान्तः ।

६१३. श्रीनिवासः—नित्योब्रघ्न निवासत्वात् श्रीनिनासः स्मृतो बुधैः ।

६१४. श्रीनिधिः—सर्वशक्तिस्वरूपे यस्मिन् सर्वाश्रीरधिष्ठिता ।

६१५. श्रीविभावनः—कर्मानुसारितया भक्तेभ्यः यथा स्वंश्रियं विभावयतीति ।

६१६. श्रीधरः—यः नित्यं अनन्तां श्रियं धरतीति सः ।

६१७. श्रीकरः— समुपासकानां सर्वैश्वर्यप्रदः ।

६१८. श्रेयः—परब्रह्मरूपेण सर्वकल्याणद्: ।

६१९. श्रीमान्:—सदा अनन्तसौभाग्य सम्पन्नः ।

६२०. लोकत्रयाश्रयः—यः पितृवत् रक्षकत्वेन जगता माश्रयभूतः ।

६२१. स्वक्षः—शोभने अक्षिणी यस्य सः शोभनाक्षः ।

६२२. स्वर्ग —शोभनानि श्रिया स्पृहणीयानि अंगानि यस्य सः ।

६२३. शतानन्दः - एकस्यैव परमानन्दस्य अनेक रूपेण विवर्त्तनात् शतानन्दः ।

६२४. नन्दी.—आनन्दयति भक्तानिति, परमानन्द दायकत्वादिति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

६२५. ज्योतिर्गणेश्वर:-ज्योतिर्गणानां सूर्यचन्द्रादीनां ईश्वर:, तेजोदातृत्वादिति

६२६. विजितात्मा—यदीयं मानसं भक्तैर्विजितं स: ।

६२७. अविधेयात्मा—अविधेय: आख्यातु मशक्य: आत्मायस्येति स: ।

६२८. सत्कीर्ति:—सौशील्यसत्त्वाद्यनन्तगुणै: सत्-शोभनाकीर्त्तिर्यस्येति स: ।

६२९. छिन्नसंशय:—अनन्तज्ञानविज्ञान रूपोद्रेकेण छिन्ना: सशीतयो यस्येति ।

६३०. उदीर्ण:—सदा सर्वत्र सर्वेषु प्रशस्य: ।

६३१. सर्वतश्चक्षु:—सर्वत: पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।

६३२. अनीश:— नास्तियस्मादधिक: अन्य: कश्चिदीश: ।

६३३. शाश्वतस्थिर — अनादि स्थिरश्च ।

६३४. भूशय:—भूमौशेत इति, वनवास समये भूशयत्वात् ।

६३५. भूषण:—भूषयति इलावलयं स्वप्रत्ताभिर्विभूतिभिरिति ।

६३६. भूति:— सर्वासां समृद्धीनां भवन स्थानम् ।

६३७. विशोक:—सदा सच्चित्स्वरूपत्वेन परमानन्द मयत्वाद्विशोक: ।

६३८. शोकनाशक: - स्परणेनैव शोकाश्रुसागरशोषकत्वात् ।

६३९. अर्चिष्मान् — अर्चि:-दिव्यं मह: तदस्यास्तीति स: ।

६४०. अर्चित.—ब्रह्मेन्द्र रुद्रादिभि: देवेज्यैरपि संस्तुत: पूजितश्च ।

६४१. कुम्भ:—कुम्भवत् सर्ववस्तूनां न्यास स्थानम् ।

६४२. विशुद्धात्मा:— विशुद्धवन्निस्त्रैगुण्य: आत्मायस्येति स: ।

६४३. विशोधन: — स्मरणमात्रेणैवानेक जन्मार्जिताघौघघाती ।

६४४. अनिरुद्ध:— वासुदेवादि मूर्त्तिषु अनिरुद्धारव्यया प्रथित:, न कुत्रापि केनापि निरोद्धुं शक्य: ।

६४५. अप्रतिरथ:—नास्तिमेवं प्रतिरथ: प्रतिपक्षोयस्य: वह्वानिष्ट जनार्दनात् ।

६४६. प्रद्युम्न:—आत्मप्रद्योतनत्वाद् प्रकृष्टं द्युम्नंवलं यस्यासौ स: ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

६४७. अमितविक्रमः— अनुपमातुलित पराक्रमः ।

६४८. कालनेमिनिहा— कालचक्रस्य अविद्याख्या यानेमिस्तां हन्ति इति ।

६४९. वीरः— त्रीरयति रिपूणिति वीरः ।

६५०. शौरिः —शूरस्य वसुदेवस्यापत्यमिति ।

६५१. शूरजनेश्वरः— सर्वेषां इन्द्रादि देवानां ईश्वरः ।

६५२. त्रिलोकात्माः—त्रिलोकाभ्यन्तरे आत्मरूपेण व्यवस्थितः ।

६५३. त्रिलोकेशः—त्रयानां लोकानामीशः, यन्निदेशवशगा, सर्वेदेयाः वर्त्तन्ते ।

६५४. केशवः—के-जलेशेते, प्रशस्ताः केशाः सन्त्यस्येति हिरण्यकेशत्वात् ।

६५५. केशिहा—केशिनामक दैत्यस्य हन्ता ।

६५६. हरि हरति पाप निचयं स्मर्तृणामिति ।

६५७. कामदेवः—चतुर्वर्गैषिणां अशेष कामदत्वात् ।

कामान् पालयति, इष्टं कर्मफलं भक्तेभ्यः प्रदायपुनः पालकत्वात् कामपालः

६५८. कामी —प्रदेयातिशयत्वेन कामैषणा रहितः ।

६५९. कान्तः—भुवनमोहकरूप वत्तया कमनीयतमः ।

६६०. कृतागमः—श्रुतिस्मृत्याद्यागम विद्या व्याजकत्वात् कृतागमः ।

६६१. अनिर्देश्यवपुः—वाचामगोचरतया यद्विषये निर्देष्टुं न ०क्यते ।
नेति नेत्यादि वाक्यैः यत्र निगमानामपि न गतिः ॥

६६२. विष्णु.—वेवेष्टि-व्याप्नोति ब्रह्माण्डाभोग मिति विष्णुः ।

६६३. वीरः—विक्रान्तः । वीरयति असुरानिति वा ।

६६४. अनन्तः - नास्त्यन्तो यस्येत्यनवधि महिमः ।

६६५. धनञ्जयः—चतुर्दिक्षु विजय माप्यसर्वेभ्यः धनहारकः ।

६६६. ब्रह्मण्यः—ब्रह्म वेदः तप, सत्यंज्ञानञ्च एषां हितकरत्वेन रक्षकः ।

६६७. ब्रह्मकृत् —वृंहयति-वर्धयति जगदिति ब्रह्म तमपि यः नियमयति सः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

६६०. ब्रह्मा: —ब्रह्मरूपेण अशेषजगत्स्रष्टा ।

६६१. ब्रह्म —सत्यज्ञानानन्दस्वरूपः ।

६७०. ब्रह्मविवर्धनः चतुर्विध पुरुषार्थं फलदातृतया ज्ञानविवर्धकः ।

६७१. ब्रह्मविद्—ब्रह्म-वेदः तत्तत्वं यः वेत्ति सः ।

६७२. ब्राह्मणः—ब्रह्मरूपेण वेदार्थं प्रकाशकाः ।

६७३. ब्रह्मी—स्वयं अन्यानपेक्षित्वेन मानमेय स्वरूप वत्त्वात् ब्रह्मीति ।

६७४. ब्रह्मज्ञः—निगमानां पारदर्शित्वात्, ब्रह्मज्ञ इति शब्द्यते ।

६७५. ब्राह्मणप्रियः—ब्राह्मणाः प्रिया यस्य, आस्योद्भवत्वोत्तेषाम् ।

६७६. महाक्रमः—महान् सर्वातिशायी क्रमः पादविक्षेपो यस्येति सः ।

६७७. महाकर्माः—जगद्रचनावन संहरणरूपानन्तकर्मवत्वात् ।

६७८. महातेजाः —अनाद्यविद्यारूप तिमिरनिकर विद्रावकं तेजो यस्येति सः ।

६७९. महोरगः –महासर्परूपः, सर्पाणामस्मि वासुकिः, इति गीतायाम् ।

६८०. महाक्रतुः—अश्वमेधादि यज्ञानां नारायणस्वरूपत्वादिति ।

६८१. महायज्वा—यः विधिपूर्वकमिष्टवान् सयज्वा, तेष्वपि यः महान् सः ।

६८२. महायज्ञः—अन्येभ्यः सर्वोत्कृष्टकारकत्वेन-महायज्ञः ।

६८३. महाहविः हूयते इति हविः घृतान्नादिकं, यस्मिन्निदं महद्रूपेण हूयते ।

६८४. स्तव्य;—स्तोतुं योग्यः, यं सर्वेस्तुवन्ति, य; अन्यानपेक्षः ।

६८५. स्तवप्रियः— स्तवः भक्तकृतास्तुतिः प्रियायस्येति ।

६८६. स्तोत्रम् - स्तूयते इति, यः स्वयं स्तोत्रस्यापि स्तोत्ररूपः ।

६८७. स्तुतिः—वागगोचर तया स्तुतिरपि यस्याधमर्ण्यता मिता ।

६८८. स्तोताः– स्वयं स्तुतिकर्त्ता-वेदाः यस्य निःश्वसितरूपाः ।

६८९. रणप्रियः—असुरैः सह युद्धं प्रियं यस्येति ।

६९०. पूर्णः—अवाप्त सकलत्वेन यः सर्वान् फलदानेन पूरयति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

६९१. पूरयिता—ऋद्धि सिध्यादिदानेन सर्पेषां कामपूरकः।

६९२. पुण्यः—स्मरणा नन्तरमेव स्मर्च्ईणां अघातिघाती।

६९३. पुण्यकीर्त्तिः—पुण्या-पापहरा कीर्त्तिः यशः, कीर्त्तनं च यस्य सः।

६९४. अनामयः— षड्भावविकारात्मक भवीय महामयनिवारकत्वात् आमय रहितः।

६९५. मनोजवः—मनसः जवः वेगः, तस्मादपि अधिकरयः।

६९६. तीर्थकर —तीर्थशब्दः- शास्त्राध्वरक्षेत्राद्यर्थपरः। विद्योपविद्यानां कर्त्ता।

६९७. वसुरेताः—वसुर्धनं सुवर्णात्मकं, तदेब वीजं यस्य।

६९८. वसुप्रदः—अकिञ्नेभ्य भक्तेभ्यः वसु-धनं मुक्तहस्तत्वेन ददातीति सः।

६९९. वसुप्रदः -देवद्रुहां धनं द्यति नाशयति इति।

७००. वासुदेवः—वसुदेवस्यापत्यं पुमानिति, सर्वजगन्निवासः वासुदेवः।

७०१. वसुः—यस्मिन् सर्वभूतानि वसन्ति।

७०२. वसुमनाः—भूभार हरणाय वसुदेवगृहे जन्मग्रहणार्थं मनो यस्येति सः।

७०३. हवि—हूयते इति हवि आज्यादिकं तद्रूपः।

७०४. सद्गतिः—समुपासकेभ्यः तत्तदभीष्ट गतिदातृत्वात् सद्गतिदायकः।

७०५. सत्कृतिः—सत-शोभना कृतिः प्रभवावन संहरणरूपा क्रिया यस्य सः।

७०६. सत्ता—सर्वेभ्यः सत्तादायकः, सर्वस्मिन् सत्ता यस्येति।

७०७. सद्भूतिः—सद्सर्वत्र विद्यमानाः भूतिविभूतयो यस्य सः।

७०८. सत्परायणः—सतां मुमुक्षूनां परमोत्कृष्टाधिष्ठानरूपः।

७०९. शूरसेनः—भूभारहरणार्थाय शूराः विक्रान्ता सेना यस्य सः।

१०. यदुश्रेष्ठः—यादवान्ववायावतंसरूपः।

११. सन्निवासः—सतां श्रेष्ठानां निवासः अधिष्ठानम्।

१२. सुयामुनः—यमुनायां गोपीभिः सहशोभनं जलक्रीडादि कर्मकर्त्ता।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

७१३. भूतावासः--भवन्ति इतिभूताः प्राणिनः तेषां आवासः, आवसन्त्यस्मिन्ति ।

७१४. वासुदेवः— वसन्त्यस्मिन् भूतानीति वासुः दीव्यतीति देवः, वासुश्चासौ देवश्चेति ।

७१५. सर्वासुनिलयः सर्वप्राणावलम्बन त्वात् । यस्मिन् सर्वेविलीयन्ते ।

७१६. अनलः—अन सर्वेषां प्राणनं चालयतीति अनलः ।

७१७. दर्पहा—दुष्कृतिनां दर्पं-अभिमानं हन्ति इति ।

७१८. दर्पदाः—मायिभ्यः दर्पं अभिमानं ददातीति ।

७१९. अदृप्तः —आहंकारिक छायारहितः ।

७२०. दुर्धरः—दुर्ग्राह्यत्वात्, दुर्ग्रहत्वात् च दुर्धरः ।

७२१. अपराजितः—बाह्याभ्यन्तर प्रतिपक्षै अजेय माहात्म्यः ।

७२२. विश्वमूर्त्तिः विशन्त्यत्रमर्त्याः इति विश्वंजगत्, तदेव मूर्तिरूपेण यस्य सः यद्वामूर्त्तिः—काठिन्यं, विराट्रूपा विश्वावभासिनी मूर्त्तिर्यस्य ।

७२३. महामूर्त्तिः—महती शेषाभोग शायिनी मूर्त्तियस्येति सः ।

७२४. दीप्तमूर्त्तिः—दीप्ताभानोज्वला परमतेजोमयी मूर्त्तियस्ये ।

७२५. अमूर्त्तिमान् —महामुर्त्तित्वेऽपिनाम रूपादिभेदैः, निर्गुणत्वाच्चमूर्त्ति रहितः

७२६. अनेकमूर्त्ति —भक्तोपकाराय अनेकरूपधारकः ।

७२७. अव्यक्तः—अनेक मूर्त्तिमत्वेऽपि स्वेच्छया अप्रकर स्वरूपः ।

७२८. शतमूर्त्तिः—अनेकामूर्त्तयो यस्य ।

७२९. शताननः--विराट् रूपत्वेनानन्ताङ्गोपाङ्गवान् ।

७३०. एकः—सजातीय विजातीय संघर्ष विधुरः ।

७३१. नैकः—एकत्वेऽपि रूपं रूपं प्रतिरूपो वभूब, इत्यनुशासनादनेकरूपः ।

७३२. सवः—सर्वं क्रत्वात्मकः, यज्ञेषु यः सोमपः । सर्वं यत्र वसति ।

७३३. कः—सर्वप्राणिषु कननात् दीप्ति कान्ति गत्याधामकत्वात् ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

७३४. किम्—किमिति प्रश्नपरं, इष्सितार्थं प्राप्त्यै यः प्रष्टव्यतार्हः ।

७३५. यत्—धर्म रक्षायें यः सदायतते, यत्र तत्रावतीर्णो भवति ।

७३६. तत्—तनोतिज्ञानभिति तत् ।

७३७. पदमन्दुत्तमम्ः—नास्त्युत्तमं पदं-स्थानं यस्मादिति । अपुनरावर्तित्वात् ।

७३८. लोकवन्धुः—लोक्यन्ते इति लोकास्तेषा माधाररूपत्वात् ।

७३९. लोकनाथः—लोकैः अभीष्ट प्राप्त्यर्थं यः नाथ्यते, लोकानां वा नाथः ।

७४०. माधवः—मायाः लक्ष्म्या धवः पति माधवः ।

७४१. भक्तवत्सलः—भजन्ति भगवन्त मितिभक्ताः तेषां, तेषु वा वत्सलः ।

७४२. सुवर्णवर्णः—श्रुतिषु रुक्मवर्ण त्वेन प्रतिपादनात् ।

७४३ हेमाङ्गः—हेम्न सुवर्णस्य द्युतिरिव भ्राजिष्णु तासनाथितान्यंगानि यस्य, वरांगः श्रेष्ठाङ्ग ।

७४४. चन्दनांगदी—चन्दयति आह्लादयति अंगदः बाहुभूषणं यस्य सः ।

७४५. वीरहा—धर्मरक्षार्थं वीरान् असुरान् हन्तीति ।

७४६. विषमः—विगतसमः, यस्यसमः तुल्यः कश्चन नास्ति ।

७४७. शून्यः—गुणातीतः ।

७४८. धृताशीः—सर्वैषणा विनिर्मुक्तस्वभाव. ।

७४९. अचल—स्वभाव गुण कर्मभिश्चालयितुमशक्य; ।

७५०. चलः—भ.व्यापृति निर्वाहार्थं चलत्वेनाभिवीक्षितः ।

७५१. अमानी—अनात्मन्यविद्यादौ मानरहितः । निरहंकारः ।

७५२. मानदः—मायाजवनिका छन्नेभ्यः मानं ददातीति ।

७५३. मान्यः—प्राकृता प्राकृतैः सर्वैरपि पूज्यः ।

७५४. लोकस्वामी—चतुर्दश भुवनाभोगस्य स्वामी, अधीश्वरः ।

७५५. त्रिलोकधृक—त्रयाणां स्वर्गमर्त्यपातालाख्यलोकानां धारकः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

५६. सुमेधा —शोभना भवोपकार प्रवणामेधा-धारणावती धीर्यस्य ।

७५७. मेधजः—मेधशब्दः यज्ञपरः, यज्ञेषु स्वस्वरूप प्रकाशकः ।

७५८. धन्यः—पुण्यवान्, स्वयं परिपूर्णस्वभावः ।

७५९. सत्यमेधा सत्या अवितथगामिनी मेधा-बुद्धिर्यस्य सः ।

७६०. धराधर —धरति चराचर मितिधरा, पृथिवी, तस्याअपि धरः ।

७६१. तेजोवृषः—तेजः स्वरूपोभूत्वा वर्षकः । उक्तञ्च—
अग्नौ प्रास्ताहुतिः सम्यगादित्य भुपतिष्ठते ।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः, प्रजाः ॥

७६२. द्युतिधरः--द्योततेऽनयेति द्युतिः कान्तिः तां धरतीति ।

७६३. सर्वशस्त्रभृतां वरः—सर्वेषुशस्त्रभृत्सुवरः श्रेष्ठः ।

७६४. प्रग्रहः —भक्तैः समुपचित श्रद्धार्पितन् यत्रपुष्पादीन् प्रकर्षेण गृह्णातीति,
गीतायामपि— पत्रं फलं पुष्पंयो मे भक्त्या प्रयछति ।
तदहं भक्त्युपहृत मश्नामि प्रयतात्मनः ॥

७६५. निग्रहः—निगृह्णातीति, सर्वान् स्ववशंबदान् करोतीति ।

७६६. व्यग्रः अनाद्यनन्तः । ध्वस्त षडूर्मिकः ।

७६७. नैकशृंगः—अनेकशृंगः, चत्यारिशृंग त्रयोअस्य पादाः इति ।

७६८. गदाग्रजः—गदनाम्नः यादवस्य अग्रजः ज्येष्ठभ्राता ।

७६९. चतुर्मूर्त्तिः—विराट्, सूत्र, तुरीयात्माद्या श्चतस्रः मूर्त्तयः यस्येति सः
चतुर्मूर्त्तिः ।

७७०. चतुर्बाहुः चत्वारो बाहवो यस्येति स ।

७७१. चतुर्व्यूहः—शरीर. वेद, महापुरुष, छन्द. पुरुषरूप चतुर्विध व्यूहरूपः ।

७७२. चतुर्गतिः—चातुर्वर्ण्याश्रमाणां गति प्रदत्वात् ।

७७३. चतुरात्मा—स्थूलसूक्ष्मे जाग्रदादौ चातुरात्म्य प्रकाशकः ।

७७४. चतुर्भावः—चतुर्णां पुरुषार्थानां भावः-प्रभवः ।

७७५. चतुर्वेदवित्—याथार्थ्येन चतुर्णां वेदानां परमोज्ञाता ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

७७६. एकपात् —वामनावतारे एकेनैव पादेन येनेलावलयमाक्रान्तम् ।

७७७. समावर्त्तः— सम्यक् आसमन्ताद् संसारचक्रं य. आवर्त्तयति ।

७७८. निवृत्तात्मा—सर्वव्यापित्वेन यस्यात्मा सर्वस्मादनिवृत्तः ।

७७९. दुर्जयः—यः केनापि जेतुमशक्यः ।

७८०. दुरतिक्रमः—यस्याति क्रमणं न सुशकं, यद्भयात् वातिवातोऽयं सूर्यस्तपतियद्भयात् एवमस्य दुरति क्रमत्वं अत्युक्ति रहितम् ।

७८१. दुर्लभः—जन्मान्तर सहस्राणां तयोयोग समाधिभिः लभ्यत्वात् ।

७८२. दुर्गमः—दुःखेन अधिगन्तुं योग्यः ।

७८३. दुर्गः— जन्मान्तरोपास्त्यर्जित पुण्यनिचय लभ्यत्वात् ।

७८४. दुरावासः— युक्तयोगिनोऽपि य हार्दाकाशे अनेकविधमाभील पारपर्यमधिगत्यैव आवासयितुं शक्नुवन्तीति ।

७८५. दुरारिहा— दुष्टान् अरोन् असुरान् हन्तीति सः ।

७८६. शुभांगः अमृतपरिवेषण समये मोहनरूप धारकत्वात् ।

७८७. लोकसारंगः—लोकसारेण प्रणवोपास्त्या गम्यः ।

७८८. सुतन्तुः—तन्यते इति तन्तुः संसाररूपः शोभनः तन्तुर्यस्येति सः ।

७८९. तन्तुवर्धन — सन्तानित सन्तन्यमान संसाररूपः तन्तु वर्धनः ।

७९०. इन्द्रकर्मा—इन्द्रशब्दः परमैश्वर्य परः । ऐश्वर्याञ्चितानि कर्मान्यस्य सः ।

७९१. महाकर्मा —पृथिव्यादि पञ्चमहाभूतानां अनन्य कारकत्वात् ।

७९२. कृतकर्मा—अनन्तपरिपूर्णत्वेन स्वानुष्ठित सदाचार वत्वादिति ।

७९३. कृतागमः—निगमागमकर्तृत्वेन, तथा बौद्धादि शास्त्राणां अपि प्रभवत्वात्

७९४. तथाचोक्तं—मयैवकथितं देवि कलौ ब्राह्मणरूपिणा ।
बौद्धशास्त्रमसत् शास्त्रं मायावादमवैदिक मित्यादिना ।।

७९'. उद्भवा—उद्गतभवः । जन्मरहितः । सर्वकारणत्वात् ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

७९६. सुन्दरः —अखिलदृष्टि मनोहरः । सर्वातिशायि सौभाग्यशालित्वात् ।

७९७. सुन्द —सु-शोभन तया पापतां चेतांसियः उनत्ति सः ।

७९८. रत्ननाभः–रमयतीति रत्नं अश्मात्मकं मण्यादिकं, तद्वदुज्वला नाभिर्यस्य

७९९. सुलोचनः—स्ववीक्षणमाया मोहितजमल्लोचनः ।

८००. अर्कः —देवेज्यैरपि परमपूज्यत्वेन, इयर्त्तीति ज्ञानगमनादिभि ।

८०१. वाजसनः – वजन्त्यनेन ज्ञान गमनादिनेति वाज अन्नं श्लोकेभ्यः सनति ददाति इति ।

८०२. शृङ्गी —मत्स्यावतारे स्वशृंगे सर्वविभूति भरितां नौकां उद्वध्ययेनोपकृतं

८०३. जयन्तः- -सर्वजेतृत्वाज्जयन्त. ।

८०४. सर्ववित्—भूतानामागतिं, गतिं, उत्पत्तिं विनाशं च यः वेत्ति सः ।

८०५. जयी —वाह्याभ्यन्तर शत्रूणां जयन शीलत्वात् जयीति युक्तम् ।

८०६. सुवर्णविन्दुः —सुवर्णस्येव कान्तिमन्तः विन्दवो अवयवा यस्येति सः ।

८०७. अक्षोभ्यः—क्षोभ्यः ऐन्द्रियकेषणानिचयैः सञ्चाल्यः, न क्षोभ्यः अक्षोभ्वः सर्ववागीश्च० सर्वेये वागधीशाः ब्रह्मपुरःसराः, तेषामपीश्वरः ।

८०८. महाह्रदः —यस्मिन् परमानन्दमहार्णवे योगिनः गाहं गाहं परमानन्द थुभाजो भवन्ति । यत्रगताः अनन्त सौख्यं प्रमिण्वन्तीति ।

८०९. महागर्त्त —ययागहनावरस्थं वस्तुजातं अशेष तया संकलयितुं न शक्यते तद्वत् भगवदीया मायाऽपि दुरत्यजा अतः युक्तमस्य महार्गत्त निभत्वम् ।

८१०. महांश्चासौभूतः कालत्रया क्रान्तिरहितः । आनन्दघनः ।

८११. महानिधिः—निधीयते सर्वमस्मिन्नितिनिधिः शेवधिः, महांश्चासौनिधिः

८१२. कुमुदः—कु पृथिव्यां अवतारग्रहणादिभिः भक्तानां आनन्दप्रदः ।

८१३. कुन्दरः—भक्तेभ्य कुन्दलता कुसुमवदुज्वलां मति रातिददातीति सः ।

८१४. कुन्दः—युक्तेभ्यः सर्वेष्टदानात् कुन्द कुसुमवदुज्वल कीर्त्तिः ।

८१५. पर्जन्यः—पर्जन्यवत् यः सदा प्रपन्नानुग्रहे रतः, समयानुकुलं यस्तेषां

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

काम पूरकः ।

८१६. पावनः—पवनइव यः सदापवमानः स्मरणमात्रेणैवार्त्तिहरः ।

८१७. अनिलः—नास्ति इलः प्रेरक यस्य, जगद्विधाने परमुखे प्रेक्षित्वं, प्रेरकत्वं च यस्य नास्तीति । स्वायत्तता सनाधितं यदीयं कारकत्वं विराजते ।

८१८. अमृताशः—स्वगुणामृतं आदरपूर्वकं यः भक्तान् आशयति सः ।

८१९. अमृवपुः—जरामरणादि भवीय व्यधिनिकुरम्बविधुरः ।

८२०. सर्वज्ञः—सर्वं शक्या शक्यं यः विजानाति सः सर्वज्ञः ।

८२१. सर्वतोमुखः—गीतायामपि- सर्वत पाणियादे तत्सर्वतोऽक्षिशिरो मुखमिति

८२२. सुलभः—अनायासेन भक्तिश्रद्धाद्युपकरण सम्प्राप्पः ।

८२३. सुव्रत —भक्तरक्षणरूपं शोभनं व्रतंयस्येति सः ।

८२४. सिद्धः—स्वतत्वस्थितिवे दिनां अयत्नसाध्यत्वात् सिद्धः ।

८२५. शत्रुजित्—शत्रून् देव वैरिण असुरान् जयतीति स ।

८२६. शत्रुतापनः—शत्रून् शातनशीलान् दानवान् यः तापयति सः ।

८२७. न्यग्रोधः-न्यग्भूतै भक्तैः स्वानुग्रहाय हृत्कमले यः रुध्यते, व्यवस्थाप्यते च सः

८२८. उदुम्बरः—गुणत्रया दुद्गतं धाम अम्बरमित्युच्यते, दुदगत रूपेणतत् यस्यास्तीति सः ।

८२९. अश्वत्थः— श्वोतिष्ठतीतिश्वत्थ , इन्द्रादिजन्तु निवहः, तेषांविनाशोन्मुखत्वात् ।

८३०. नश्वत्थः—यः अपरिमेयानुपमानन्तगुण गौरवगरिमाञ्चितत्वेन निर्वातदीपकलिका वत् सदैकरूप्पतां बिभाणः विराजते सोऽश्वत्थः ऊर्ध्वमूलः अवाक् शाखः ।

८३१. चाणूरान्ध्रनिषूदनः—आन्ध्रदेशीयं चाणूरमल्लंयः निषूदितवान् ।

८३२. उक्तंच—दामोदरकराछात विह्वलीकृत चेतसा । दृष्टं चाणूरमल्ले न शतचन्द्रं नभ स्थलमिति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

८३३. सहस्रार्चिः—मार्त्तण्डमण्डले सहस्र अर्चींषि येन जगद् व्यापार चालनाय न्यस्तानि ।

८३४. सप्तजिह्वः—काली करालीमनोजवाद्याः वह्नेः सप्तजिह्वाः, तद्रुपेण यो व्यवस्थितः ।

८३५. सप्तैधा—सप्त एधसः दीप्तयो यस्य सः ।

८३६. सप्तवाहन-गायत्री-वृहती-उष्णिक्-त्रिष्टुबादीनि सप्तछन्दांसि यं वहन्तीति

८३७. अमूर्तिः—स्थूलभौतिक मूर्त्तिभ्यो यः व्यावृत्तः सः अमूर्त्तिः ।

८३८. अनघः—निष्पापः । कार्मिकवश्यता रहित ।

८३९. अचिन्त्यः—सुनिरूप्यता रहितः । सर्वे वेदा यत्पदमामनन्तीति श्रुतेः ।

८४०. भयकृत्—उन्मार्गगानां नरकादिगति प्रदान द्वारा भयदायकः ।

८४१. भयनाशनः—स्वानुवर्त्तिनां सतां संसार संसरणभयं नाशयतीति सः ।

८४२. अणुः—अतिसूक्ष्महाकाशे प्रविश्य सर्वव्यापृति चालकत्वात् । सूक्ष्मरूपत्वाच्च ।

८४३. वृहत् यः, महतोऽपि महीयान् ।

८४४. कृशः— लघिम्ना यः सर्वत्र अव्याहतगतिः ।

८४५. स्थूलः—दृश्यमान विराट्रूपः ।

८४६. गुणभृत्—सत्वादिगुणानां अथ च प्रभवावन प्रलयानां धारकः ।

८४७. निर्गुणः—गुणत्रयातीतः ।

८४८. महान्—अनितरभावि नित्य शुद्धबुद्ध सर्वगतत्वादि गुणयुक्तः ।

८४९. अधृतः—यः केनापि अनियाम्यः, धर्त्तुमशक्यश्च ।

८५०. स्वधृतः—यः स्वात्मनैव स्वात्मानं धरति । अन्यानपेक्षत्वात् ।

८५१. स्वास्यः—आसनं-स्थितिः, आस्यं-आननं सर्वातिशायि यस्येति सः ।

८५२. प्राग्वंशः—प्राक्कालाद्ये अनादिमुक्तास्तेषामपि उद्भवभूमिवत्वात् ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

८५३. वंशवर्धनः—संसार प्रपञ्चो वंशः तं यथा स्वंवर्धयतीति ।

८५४. भारभृत्-मुक्तानां बन्धमोक्षादिभारं, अथ च विश्वम्भरा भारं यः बिभर्त्ति

८५५. कथितः —निगमागमकदम्बेकषु यः सर्वत्र कथितो गुणः ।

८५६. योगी —सर्ववृत्ति निरोधः योगः तेनलभ्यः ।

८५७. योगीशः—योगीनां नारदादीनां । सनकादीनांईशः धुर्यः ।

८५८. सर्वकामदः—मुक्तघन्तरायरूपान् सर्वान् विषयसुखान् योगास्खलितेथ; ददातीति तथोक्तः ।

८५९. आश्रम;—चराचर जन्तूनां विश्रान्ति स्थानम् ।

८६०. श्रमणः— अक्षीण पूर्वसंस्कारेभ्य प्राकृतेभ्यः सन्तापदायित्वात् ।

८६१. क्षामः—सर्वभूत क्षयकरः (क्षि क्षये) क्षायोमः ।

८६२. सुपर्ण —शोभनाः वेदरूपा पर्णा यस्य, छन्दांसि यस्य पर्णानि ।

८६३. वायुवाहनः —सन्मार्गच्युतान् यः वायुवद् वाहयति स वायुवाहनः ।

८६४. धनुर्धरः—दुर्दान्ता सुरसंहाराय धनुर्धारयति यः ।

८६५. धनुर्वेदः—देवा. अपि-धनुः शास्त्रं यस्माद् विन्दन्ति सः धनुर्वेदः ।

८६६. दण्डः—दुष्टान् दण्डनीत्या यः दाम्यति, इति दमनाद्दण्डः ।

८६७. दमयिता—धर्मराज रूपेण सर्वेषां दमन कर्त्ता ।

८६८. दमः—धर्मद्रुहां दमनाद्यमः ।

८६९. अपराजित —विस्तृते भवशासने यस्य कुत्रापि प्रतिहतिः नास्ति, याश्च सर्वान् पराजयते सः ।

८७०. सर्वसहः यः सर्वं बिभर्त्ति, सर्वं च भारं सहेत सः सर्वसहः ।

८७१. नियन्ता —नियमयति सर्वान् स्वोचित व्यापृतिषु ।

८७२. नियमः—नास्ति कश्चिन्नियन्ता यस्येति सः ।

८७३. यमः— सर्वं संयमनाद्यमः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

८७४. सत्ववान् सतोभाव सत्वं मोक्षसाधन यस्यास्तीति सः ।

८७५. सत्यः सत्सु वसतीति, यथार्थं वैभववत्वाच्च ।

८७६. सत्यधर्मपरायण सत्य धर्मरक्षायै सदा संलग्नः ।

८७७ पुरुषार्थपराः—यस्मात्मुक्ति कामयन्ते । स अभिप्रायः ।

८७८. प्रियार्हः--प्रियमर्हतीति सः ।

८७९ अर्हः—सर्वप्रकारेण अष्टाङ्गयोगोपास्त्या पूजार्हः ।

८८०. प्रियकृत्—सर्वेषां हितकारकः ।

८८१. प्रीतिवर्द्धनः—भक्तानां अधिकां प्रीतिवर्धयतीति सः ।

८८२. विहायसगतिः—इतर वैशिष्ट्येन निरालम्बे अम्बरे गतिर्यस्य ।

८८३. ज्योतिः— यः सर्वत्र द्योतते, स्वप्रकाशरूपत्वादिति ।

८८४. सुरुचिः— शोभना भक्तहितकरीरुचिर्यस्येति ।

८८५. हुतभुक्—हुतं अग्नौवषट् कृतं हविः भुनक्तीति सः ।

८८६. विभु.—अन्यानपेक्षया विशेषेण भवतीति विभुः व्यापकः ।

८८७. रविः—सूयते सर्वं वैशिष्ट्येन प्रकाश्यते इति रविः ।

८८८. विरोचन —अयन द्वयगत्या सूर्यादिखेटान् यः विरोचयति ।

८८९. सूर्यः—सरत्याकाशे गच्छति इति । सर्वप्रभव कारकः ।

८९०. सविता वृष्टि सस्यादिकं यः सूते, यश्चसर्वेषां प्रेरकः ।

८९१. रविलोचनः—चन्द्रार्कौ लोचनस्थानीयौ यस्य स अग्निर्मूर्धाचक्षुषी चन्द्रसूर्योदिशः श्रोत्रे, इति श्रुतिः ।

८९२. अनन्तः—नास्त्यन्तो यस्य, यश्च विश्वस्यान्तकृत् ।

८९३. हुतर्भुक्—हुत-हविर्भुनक्तीति ।

८९४. भोक्ता—भुनक्ति-पालयति, अभ्यवहरति च सर्वानिति ।

८९५. सुखदः—भक्तेभ्यः प्रपन्नेभ्यः मुक्तिरूपमनन्तसुखं ददातीति ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

८९६. नैकजः—धर्मरक्षार्थं अनेकयोनिषु पुनःपुनः जन्मग्रहण कर्त्ता।

८९७. अग्रज.-अग्रजातत्वात् हिरण्यगर्भः समवर्त्तताग्रे इति श्रुतिरेवात्र निदर्शनम्

८९८. अनिर्विण्णः—निर्विण्णः सर्वैराग्य, अवाप्तसकल कामत्वेन तुरीयातीत तामितः।

८९९. सदामर्षी—भक्तानां कृतं अकृतं च मर्षितुं शीलमस्येति।

९००. लोकाधिष्ठानम् —वीतरागाणां सदाअधिष्ठानं आश्रयः।

९०१. अद्भुतः—चतुर्दिक्षु सर्वाश्चर्यरूपः।

९०२. सनात्— अद्भुतानां संभजनात्, कालरूपकल्पेभ्यः श्रेष्ठः।

९०३. सनातन तम —ब्रह्मादय सनातनाः, अयतेभ्योऽपि पुरातनः।

९०४. कपिलः—कपिलवर्णः, और्वाग्निरूपः।

९०५. कपिः—कपिर्वराहः श्रेष्ठश्चेति महाभारते।

९०६. अव्ययः—नव्येति इत्यव्ययः जन्मादिरहितत्वादिति।

९०७. स्वस्तिदः -भक्तेभ्यः स्वस्ति-कल्याणं ददातीति भक्तकल्याणप्रदः।

९०८. स्वस्तिकृत्—चतुर्विध प्राणिनिवहस्य कल्याण कारकः।

९०९. स्वस्ति—परमानन्दघनो अमङ्गलापहारी।

९१०. स्वस्तिभुक् -स्वस्तिकल्याणं असुराणां भुनक्तीदि।

९११. स्वस्तिदक्षिणः—कल्याण वर्धक। दक्षवृद्धौ।

९१२. अरौद्रः-सर्वैश्वर्यवत्वेऽपि रागद्वेषादि रहितः। एषामेव रौद्रतानिदानत्वात्

९१३. कुण्डली सांख्ययोगरूपौ कुण्डलौ अस्यास्तीति कुण्डली।

९१४. चक्री—भक्तरक्षार्थं सुदर्शन चक्रधारकः।

९१५. विक्रमी—विशिष्ट क्रमः पादन्यासो यस्य, यद्वा-विक्रमः अस्यास्तीति।

९१६. ऊर्जित शासनः—ब्रह्माद्यलंध्यस्वाज्ञः।

९१७. शब्दातिगः अनन्त शाखैराम्नायैः तथा भारत्या यदीयामहिमावक्तु अशक्या, सः शब्दातिगः।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

९१८. शब्दसह —शब्दानां सहः सर्वेवेदायत्पदमा मामनन्ति इति श्रुतेः ।

९१९. शिशिरः —तापत्रयोपतप्तानां परमाह्लाद रूपशैत्य दानात् शिशिरः ।

९२०. शर्वरीकरः —कुमार्गगेभ्यः शर्वरींमोहमयीं रात्रिं करोति, ज्ञानिभ्यः ।

९२१. अक्रूरः—अवाप्तसर्व कामतया क्रूरतारहितः ।

९२२. पेशलः -शरीरवाङ् मनोभिः सुभूषितविग्रहः ।

९२३. दक्षः—शीघ्रकारी, सर्वकार्यसमर्थः ।

९२४. दक्षिणः —भवव्यापार संसाधनप्रवीणः ।

९२५. क्षमिणां वरः—क्षमावतां पृथ्वादीनामपि मध्येवरः श्रेष्ठः ।

९२६. विद्वत्तमः —विद्वत्सु-विवेकवत्सु सर्वश्रेष्ठः ।

९२७. वीतभयः—सार्वत्रिक संसार भय रहितः ।

९२८. पुण्यश्रवणकीर्त्तनः—यस्यनाम्नां श्रवणेन कीर्त्तनेन, स्मरणेन च ।

९२९. पुण्यप्राप्तिः—अशुभविघातश्च भवति स ।

९३०. उत्तारणः—अपारं अगार्धं च संसार महार्णवं यः तारितवान् ।

९३१. दुष्कृतिहा—दुष्कृतिः पापव्यूहः तं हन्ति दूरीकरोति इति ।

९३२. पुण्यः—स्मरणादेव यः आत्मानं पुनाति स्मर्त्तृणा मिति ।

९३३. दुःस्वप्ननाशनः—ध्यानस्तुत्यादिभिः अशुभावह स्वप्नानां नाशकः ।

९३४. वीरहा—धर्मद्रुहः विक्रान्तानसुरान् हन्तीति वीरहा ।

९३५. रक्षणः— ईतिभीतिभ्यः परितस्तया य. भक्तान् रक्षतीति सः ।

९३६. मन्तः—स्वाश्रितानां प्रपन्नानां सन्तननात्-सम्वर्धनात् सन्तः इति ।

९३७. जीवनः—जीवयतीति, स्वयमेवग्राहमुन्मथ्य, पश्चाद् गन्धर्वत्वेन यस्
जीवयामास गजेन्द्रमोक्षे इति ।

९३८. पर्यवस्थितः—परितः सर्वदिक्षु व्यापकत्वेन यः व्यवस्थित. ।

९३९. अनन्तरूपः—चराचरे संसारे योऽनन्तरूप धारकत्वेन स्थितः ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

९४०. अनन्तश्रीः—प्रपन्नेभ्यो देयाः अनन्ताः श्रियः यस्याभ्याशे सन्तीति ।

९४१. जितमन्यु—जितक्रोधः । षड्ऊर्मिबाधा विवर्जितः ।

९४२. भयापहः—चरणशरणमापन्नानां भयमपहन्तीति भयापहः ।

९४३. चतुरस्रः—यः समवेतकारी न्यायानुकूल. स चतुरस्रः ।

९४४. गभीरात्मा- ब्रह्मेन्द्रादिभिरप्यधृष्यं गाम्भर्यमस्य सः ।

९४५. विदिशः—विदिशति विविधं कर्मफलं भक्तेभ्यः ।

९४६. व्यादिशः—विशेषेण आदिशति लोकपालेभ्यः स्वादेशमिति ।

९४७. दिशः—निगमागमरूपेण यः सन्मार्गं दिशति ।

९४८. अनादिः—नास्त्यादिः कारणं यस्य, यः सर्वेषां कारणं ।

४९. भूर्भुवः— भवन्त्यस्यामितिभू पृथ्वी, तस्या अपि अधिष्ठानरूपः ।

९५०. लक्ष्मीः—आत्मलाभवतां सर्वसम्पद्रूपेण यः वर्त्तते स लक्ष्मीत्युच्यते ।

९५१ सुवीरः—शोभनागतिर्यस्य, श्रवणादीनिज्ञानसाधनानि सुन्दराणि यस्य ।

९५२ रुचिराङ्गदः-रुचिराति आदत्ते इतिरुचिरं-सुन्दरं अंगदं भुजभूषणं यस्येति

९५३. जननः—जनयति जीवानिति, यः सर्वोत्पादकः । सर्वस्रष्टा चेति ।

९५४. जनजन्मादि —जनजन्मनां आदिः मूलकारणत्वेन व्यवस्थितः ।

९५५. भीमः—विमुखानां निरन्तरं गर्भवासादि हेतुत्वाद् भयंकरः ।

९५६. भीमपराक्रमः—सर्वलोकाहितकरेषुभीमः पराक्रमो यस्य सः ।

९५७. आधारनिलयः -सर्वाधारभूतानां पृथिव्यादीनामपि यः निलयभूतः ।

९५८. अधाता—जन्मजरामरणादि विकल्परहितः ।

९५९. पुष्पहासः—स्वात्मानुभवशक्तीनां पुष्यवत् हासः विकासः अस्यास्तीत्ति ।

९६०. प्रजागरः- -यः नक्तं दिवं प्रपन्नार्त्ति हरणाय जागर्त्ति सः ।

९६१. ऊर्ध्वगः - ऊर्ध्वगामी, अनुपम माहात्म्येन यः स्वभावेनैव तुंगः ।

९६२. सत्पथाचारः—सतां सन्मार्गे चालकः । प्रवर्त्तकश्च ।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

९६३. प्राणदः—नष्टात्मनामपि आत्मोज्जीवनं यः ददाति, परीक्षिदादीनामिति

९६४. प्रणवः-प्रणयते सर्वं रिति प्रणवः ॐकार। तेनय सर्वान् पादयो प्रणमपति

९६५. पणः—पणशब्द व्यवहार परः। स्वाम्यदास्य व्यतीहारादयो व्यवहाराः।

९६६. प्रमाणं—स्वयं अनन्तज्ञानानन्द रूपत्वेन परमार्थ त्रयी सार प्रत्यायकः।

९६७. प्राणनिलयः – जागतिकाः प्राणाः नीडे शकुन्ता इव यस्मिन्।
प्रलीयन्ते सः सर्वाधिष्ठान तया प्राणनिलयः स्मृतः।

९६८. प्राणभृत् –प्राणिनां प्राणान् यः जननीवन् बिभर्त्ति सः।

९६९. प्राणजीवन –सर्वसन्धारक तया अन्न ब्रह्मेति सर्वान् जीवयति सः।

९७०. तत्वं –तस्य भावस्तत्वं,-यो संसारस्य सारांशसत्ता सहितः।

९७१ तत्ववित्— तत्वंवेत्तीति, स्वात्मतत्व विवेक्तृत्वात्।

९७२. एकात्मा -चिद चिदात्मके संसृतिचक्रे एकात्मत्वेन य. व्यवस्थितः।

९७३. जन्ममृत्यु—चिदचिद्धर्महीन त्वेन य. जरामरणादीनतीत्य गच्छति।

९७४. भूर्भुव स्वःतमः—त्रैलोक्य रूपवृक्षस्य कामनापूरणाय पारिजात तरुरिव

९७५. तारः—तारयति जगदर्णवादिति। यद्वा प्रणवरूपेण यस्तारकः।

९७६. सविता—सर्वेषां प्रेरक.। यश्चाखिलभूतानां जनयिता।

९७७. प्रपितामहः—पितुः पितापितामहः ब्रह्मातस्यापि यो जनकः स।

९७८. यज्ञः—यज्ञानां जपयज्ञोस्मीति गीतायांगीतृमाहात्म्यात्।

९७९. यज्ञपतिः यज्ञानां फलदातृत्वेन पालकत्वेन वा पतिः रक्षकः।

९८०. यज्वा –यज्वा तु विधिनेष्टवान्। यः स्वयं यजमान स्वरूपः।

९८१. यज्ञाङ्गः—यज्ञाः अंगान्यस्येति, वराहमूर्त्ति धारकत्वात्।

९८२. यज्ञवाहन –यज्ञं वहति, यज्ञंबहति, वाहयति वा, यज्ञफलदायकत्वात्।

९८३. यज्ञभृतृ—यजमानैरनुष्ठीय मानं यज्ञं आतकं परीहारपूर्वकं यः विभर्त्ति।

९८४. यज्ञकृत्—जगद्धिताय सर्गादौ यज्ञानुष्ठानं प्रयागादिषु यः कृतवान्।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

९८५. यज्ञी—यः सर्वयज्ञप्रधानः, यस्तेषु अर्हत्तमः, सर्वेज्यश्च ।
९८६. यज्ञभुक्—यज्ञान्, यज्ञेषु वा भुनक्ति भोजयति वेति सः ।
९८७. यज्ञसाधनः—यज्ञोपकरणानां चषाल, दर्व्यादीनां साधनाङ्गरूपः ।
९८८. यज्ञान्तकृत्—यः निरपेक्षं यज्ञान्तं कर्मफलदानं करोति सः ।
९८९. यज्ञगुह्यम्—स्थूला धिषणैः यस्यतत्व वेत्तु न शक्यते ।
९९०. अन्नम्—अद्यते इति, सर्वेषां अन्नदः, यश्च सर्वेषां भोक्ता ।
९९१. अन्नादः—अन्नंअत्तीति, यः स्वयं आदत्ते, अथच भुक्ते सः ।
९९२. आत्मयोनिः—यः आत्मना स्वयमेव भवति, यः भोक्तारं आत्मना नित्य
योजयति सः ।
९९३. स्वयंजातः यः अन्यप्रार्थनाद्यनपेक्षया जायते स ।
९९४. वैखानः—यः सांसारिक दुःखं जनित्वा पुनरुद्धाराय खनति सः ।
९९५. सामगायन—सामगायन्तीति सामगा सामवेदिनः, तेषामयनम् ।
९९६. देवकीनन्दनः—यः सर्वोत्कृष्टोऽपि देवक्याः तनयत्वेन प्रजज्ञिवान् ।
९९७. स्रष्टा—सर्व संसारस्यनिर्माता, पालकः संहारकश्चेति ।
९९८. क्षितीशं—क्षियन्ति भूतान्यस्यामिति क्षितिः विश्वम्भरः ।
तस्याः ईशः, कर्त्तुमकर्तुमन्यथा कर्त्तुं च समर्थः
९९९. पापनाशनः—पातिरक्षति आत्मानमस्मादिति पापं वृजिनपद बाच्यम् ।
जगतामघौघं नाशयतीति पापनाशनः ।
१०००. शंखभृत्—शंखबिभर्तीति, पाञ्चजन्य सन्धारकत्वात् ।
१००१. नन्दकी—नन्दयतीति नन्दकः खड्गः, तदस्यास्तीति नन्दकी ।
१००२ चक्री—चक्रं सुदर्शनाख्यं करे अस्यास्तीति चक्री ।
१००३. शार्ङ्गधन्वा—शृंगस्थ विकारः धनुः शार्ङ्गतदस्यास्तीति ।
१००४. गदाधर—कौमोदकी नामक गदाधारणात् गदाधरः ।
१००५. रथाङ्गपाणिः—रथाङ्ग सुदर्शनचक्रं पाणौ यस्य सः ।
१००६. अक्षोभ्य—केनापि अचाल्यः यश्च सर्वेषां नियामकः ।
१००७. सर्वप्रहाणायुधः—सर्वदालोक रक्षार्थं अनन्तान्या युधानियस्य सन्ति सः
सर्वप्रहरणायुधः ।

(ॐ नमो भगवते वासुदेवाय)
। श्रीगुरुचरण कमलरेणवो विजयन्ते ।।

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA

CC-0. JK Sanskrit Academy, Jammmu. Digitized by S3 Foundation USA